॥ श्रीः ॥

श्रीमत्कालिदासविरचितः

श्रुतबोधः ।

तथा श्रीमत्पव्येकसूनुना केदारा-
ख्येन प्रणीतः

वृत्तरत्नाकरः ।

इमौ सरलसुबोधव्याख्यालंकृतौ ग्रंथौ
भगीरथात्मजेन हरिप्रसादशर्मणा

मुंबय्यां
जावजी दादाजी इत्येतेषां
"निर्णयसागराख्यमुद्रणयंत्रालये" मुद्रयित्वा प्रकाशितौ।

शकाब्दाः १८१५ संवत् १९५०.

॥ श्रीः ॥

श्रीमत्कालिदासविरचितः

श्रुतबोधः ।

तथा श्रीमत्पव्येकसूनुना केदारा-
ख्येन प्रणीतः

वृत्तरत्नाकरः ।

इमौ सरलसुबोधव्याख्यालंकृतौ ग्रंथौ

भगीरथात्मजेन हरिप्रसादशर्मणा

मुंबय्यां

जावजी दादाजी इत्येतेषां

"निर्णयसागराख्यमुद्रणयंत्रालये"मुद्रयित्वा प्रकाशितौ

शकाब्दाः १८१९ संवत् १९५०.

श्रीः

श्रीमत्कालिदासप्रणीतः

श्रुतबोधः ।

छंदसां लक्षणं येन श्रुतमात्रेण बुध्यते ।
तमहं संप्रवक्ष्यामि श्रुतबोधमविस्तरम् ॥ १ ॥

श्रीमत्सारस्वतं धाम नत्वा स्तुत्वा च सद्गुरुम् ।
टीका श्रीश्रुतबोधस्य छंदसः क्रियते मया ॥ १ ॥

छंदसामिति ॥ अहं तं श्रुतबोधं नाम छंदःशास्त्रं संप्रवक्ष्यामि । कीदृशं तम् । अविस्तरं न विद्यते विस्तरो यस्मिन् सोऽविस्तरस्तमविस्तरम् । येन श्रुतमात्रेण प्रस्तारादिविनैव छंदसामार्यानुष्टुबादीनां लक्षणं गुरुलघुवर्णमात्रागणादिस्वरूपं बुध्यते ज्ञायत इत्यन्वयः ॥ १ ॥

संयुक्ताद्यं दीर्घं सानुस्वारं विसर्गसंमिश्रम् ।
विज्ञेयमक्षरं गुरु पदांतस्थं विकल्पेन ॥ २ ॥

संयुक्ताद्यमिति ॥ अथ छंदोलक्षणस्य लघुगुरुज्ञानमंतरेण दुर्विज्ञेयत्वाल्लघुगुरुलक्षणमाह । एतादृशमक्षरं गुरु ज्ञेयम् । कीदृशमक्षरम् । संयुक्ताद्यं संयुक्तस्य संयोगीभूतस्याद्यमादिभवम् । पुनः कीदृशम् । दीर्घं द्विमात्रकम् । सानुस्वारमनुस्वारेण सह वर्तमानम् । पुनः विसर्गसंमिश्रं विसर्गेण संमिश्रं विसर्गसहितम् । पादांतस्थमक्षरं विकल्पेन गुरु लघु विज्ञेयम् । पादांते गुरुरपि लघुः स्यात्कुत्रचिल्लघुरपि गुरुः स्यात् । तथा-

चोक्तं ग्रंथांतरे । वा पादांते त्वसौ वक्रो ज्ञेयोऽन्यो मात्रको लघुः ॥ २ ॥

श्लोकादौ कस्मिंश्चिद्गणे पतिते शुभं कस्मिंश्चिद्गणे पतिते चाशुभं भवतीत्यष्टगणानां लक्षणमाह–

आदिमध्यावसानेषु भजसा यांति गौरवम् ।
यरता लाघवं यांति मनौ तु गुरुलाघवम् ॥३॥

आदिमध्यावसानेष्विति ॥ भजसाः भगणजगणसगणाः आदिमध्यावसानेषु गौरवं गुरुतां यांति । आदिश्च मध्यं च आवसानं च तानि तेषु ॥ तथाहि । आदिगुरुर्भगणः मध्यगुरुर्जगणः अंत्यगुरुः सगणः यरताः यगणरगणतगणाः आदिमध्यावसानेषु लाघवं लघुतां यांति । तथाहि । आदिलघुर्यगणः मध्यलघू रगणः अंत्यलघुस्तगणः । तु पुनः मनौ मगणनगणौ आदिमध्यावसानेषु गुरुलाघवं गुरुतां लघुतां च यातः । तथा च । सर्वगुरुर्मगणः सर्वलघुर्नगणः भवतीति । एतेषां देवताः फलानि च ग्रंथांतरे । मो भूमिः श्रियमातनोति य जलं वृद्धिं रवह्निर्मृतिं सो वायुः परदेशदूरगमनं त व्योम शून्यं फलम् ॥ जः सूर्यो भयमाददाति विपुलं भेंदुर्यशो निर्मलं नो नाकश्च सुखप्रदः फलमिदं प्राहुर्गणानां बुधाः ॥ ३ ॥

यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये चतुर्थके पंचदश सार्या ॥ ४ ॥

यस्याः पाद इति ॥ सा आर्या भवति । सा का । यस्याः प्रथमे पादे द्वादश मात्राः स्युः । तृतीये तथा द्वादश मात्रा भवंति । द्वितीयेऽष्टादश मात्रा भवंति । चतुर्थके पंचदश मात्रा भवंति । सा आर्या ॥ ४ ॥ आर्या । चरणेषु क्रमान्मात्राः– १२, १८, १२, १५ ॥

आर्यापूर्वार्धसमं द्वितीयमपि यत्र भवति हंसगते ।
छंदोविदस्तदानीं गीतिंताममृतवाणि भाषंते ॥ ५ ॥

आर्यापूर्वार्धसममिति ॥ हे अमृतवाणि छंदोविदस्तदानीं तां गीतिं भाषंते ब्रुवते । हे हंसगते यत्रार्यापूर्वार्धसमं द्वितीयमपि उत्तरार्धमपि भवति । पूर्वार्धस्य प्रथमे द्वादश मात्रा द्वितीयेऽष्टादश तृतीये द्वादश चतुर्थकेऽष्टादश संकलनया षष्टिमात्रेत्यर्थः । अमृतमिव वाणी वाक् यस्याः सामृतवाणी तस्याः संबुद्धौ । छंदांसि विदंति जानंतीति छंदोविदः शास्त्रज्ञा इत्यर्थः । हंसस्य गतिर्गमनमिव गमनं यस्याः सा हंसगता तस्याः संबुद्धौ हंसगते इत्यर्थः ॥ ५ ॥ गीतिः । चरणेषु क्रमान्मात्राः– १२, १८, १२, १८ ॥

आर्योत्तरार्धतुल्यं प्रथमार्धमपि प्रयुक्तं चेत् ।
कामिनि तामुपगीतिं प्रकाशयंते महाकवयः ॥ ६ ॥

अर्योत्तरार्धतुल्यमिति ॥ हे कामिनि महाकवयस्तामुपगीतिं प्रकाशयंते । उपगीतिसंज्ञकां प्रकटीकुर्वते इत्यर्थः । यदि आर्योत्तरार्धतुल्यं प्रथमार्धमपि प्रयुक्तं चेत्प्रयोगीकृतं भवति । उत्तरार्धेन द्वादशमात्रिकेण तुल्यं समानं भवति । प्रथमे द्वादश मात्रा द्वितीये पंचदश तृतीये द्वादश चतुर्थे पंचदश संकलनया ५४ चतुष्पंचाशन्मात्रेत्यर्थः । कामो विद्यते यस्याः सा कामिनी तस्याः संबुद्धौ । महांतश्च ते कवयश्चेति कर्मधारयः । तथाचोक्तं ग्रंथांतरे । आर्याद्वितीयकेऽर्धे यद्गदितं लक्षणं तत्स्यात् । यद्युभयोरपि दलयोरुपगीतिं तां मुनिर्ब्रूते ॥ ६ ॥ उपगीतिः । चरणेषु क्रमान्मात्राः– १२, १५, १२, १५ ॥

अथाक्षरपंक्तिः—

आद्यचतुर्थं पंचमकं चेत् ।
यत्र गुरु स्यात्साक्षरपंक्तिः ॥ ७ ॥

आद्यचतुर्थमिति ॥ यत्र यस्यां वृत्तौ आद्यं प्रथमं चतुर्थं पंचमकं गुरु स्यात्साक्षरपंक्तिः ज्ञेया । अक्षरशब्दः पादपूरणार्थः । छंदस्तु पंक्तिः । प्रतिचरणे इदं लक्षणम् । तथा चोक्तं रत्नाकरे । भोगाविति पंक्तिः ॥ ७ ॥ अक्षरपंक्तिः । चरणाक्षराणि ५, ग० भ; गु, गु ॥

अगुरुचतुष्कं भवति गुरू द्वौ ।
घनकुचयुग्मे शशिवदनासौ ॥ ८ ॥

अगुर्विति ॥ हे घनकुचयुग्मे यत्राद्यं चतुष्कं वर्णचतुष्टयं अगुरु स्याच्चत्वारो वर्णा लघवः संति ततो द्वौ पंचमषष्ठौ गुरू दीर्घौ भवतस्तदा शशिवदना चरणचतुष्टयेष्विदं लक्षणं असाविति संबंधः । घनं कठिनं कुचयुग्मं यस्याः सा घनकुचयुग्मा तस्याः संबुद्धौ । तथाचोक्तं रत्नाकरे । शशिवदनान्यौ ॥ ८ ॥ शशिवदना । चरणाक्ष० ६, ग० न, य ॥

सप्ताक्षरजातौ मदलेखालक्षणमाह—

तुर्यं पंचमकं चेद्यत्र स्याल्लघु बाले ।
विद्वद्भिर्मृगनेत्रे प्रोक्ता सा मदलेखा ॥ ९ ॥

तुर्यमिति ॥ हे मृगनेत्रे यदि तुर्यं चतुर्थं पंचमकं पंचमं लघु स्यात् हे बाले नवयौवने विद्वद्भिः पंडितैः सा मदलेखा प्रोक्ता । मृगस्य नेत्रे इव नेत्रे यस्याः सा मृगनेत्रा तस्याः संबुद्धौ । उक्तं रत्नाकरे । मसौ गः स्यान्मदलेखा ॥ ९ ॥ मदलेखा । चरणाक्ष० ७, ग० म, स; ग ॥

अष्टाक्षरजातौ पद्यलक्षणमाह—

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पंचमम् ।
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥ १० ॥

श्लोक इति ॥ अन्ययोः प्रथमतृतीयपादयोः सप्तममक्षरं गुरु द्विमात्रकं भवति । सर्वत्र चतुर्ष्वपि चरणेषु पंचममक्षरं लघु स्यात् । षष्ठं गुरु स्यात् । द्विचतुष्पादयोर्द्वितीयचतुर्थचरणयोः सप्तममक्षरं ह्रस्वं ज्ञेयम् । ईदृग्विधे श्लोके पद्येऽनुष्टुबादयो भवंति ॥ १० ॥

अथ पद्यलक्षणमाह—

पंचमं लघु सर्वत्र सप्तमं द्विचतुर्थयोः ।
षष्ठं गुरु विजानीयादेतत्पद्यस्य लक्षणम् ॥ ११ ॥

पंचममिति ॥ एतत्पद्यस्य लक्षणं विजानीयात् । यत्र सर्वत्र चरणेषु पंचमं लघु भवति । द्विचतुर्थयोः द्वितीयचतुर्थचरणयोः सप्तममक्षरं लघु भवति । सर्वत्र चरणेषु षष्ठं अक्षरं गुरु भवति ॥ ११ ॥ पद्यं । चरणाक्ष० ८, गणनियमो नास्ति ॥

माणवकाक्रीडलक्षणमाह—

आदिगतं तुर्यगतं पंचमकं चांत्यगतम् ॥
स्याद्गुरु चेत्तत्कथितं माणवकाक्रीडमिदम् ॥ १२ ॥

आदिगतमिति ॥ तदिदं माणवकाक्रीडं कथितं कविभिरित्यध्याहार्यम् । आदिगतं प्रथमं तुर्यगतं चतुर्थं पंचमकं पंचमं अंत्यगतं अंत्यस्थितमष्टमं गुरु स्यात्तदिदं माणवकाक्रीडं बुधा वदंति । तथाचोक्तं रत्नाकरे । माणवकं भस्तलगाः ॥ १२ ॥ माणवकं । चरणाक्ष० ८, ग० भ, त; ल, ग ॥

अथ नगस्वरूपिणी (प्रमाणिका) लक्षणमाह—

द्वितुर्यषष्ठमष्टमं गुरु प्रयोजितं यदा ।
तदा निवेदयंति तां बुधा नगस्वरूपिणीम् ॥१३॥

द्वितुर्येति ॥ बुधाः पंडिताः तदानीं नगस्वरूपिणीं निवेदयंति । तदा कदा यदा द्वितीयं तुर्यं चतुर्थं षष्ठं अष्टमं चाक्षरं गुरु प्रयोजितं गुरुसंज्ञकं भवति एतादृशीं तां नगस्वरूपिणीं निवेदयंति । तथाचोक्तं रत्नाकरे । प्रमाणिका जरौ लगौ ॥ १३ ॥ प्रमाणिका, नगस्वरूपिणीति वा । च० अ० ८, ग० ज, र; ल, ग ॥

अथ विद्युन्मालालक्षणमाह—

सर्वे वर्णा दीर्घा यस्यां विश्रामः स्याद्वेदैर्वेदैः ।
विद्वद्वृंदैर्वीणावाणि व्याख्याता सा विद्युन्माला १४

सर्वे वर्णा इति ॥ हे वीणावाणि विद्वद्वृंदैः पंडितसमूहैः सा विद्युन्माला व्याख्याता । वीणायाः वाणीव वाणी यस्याः सा वीणावाणी तस्याः संबुद्धौ । विदुषां पंडितानां वृंदानि समूहास्तैः । सा का । यस्यां सर्वे वर्णाः दीर्घाः गुरुभूताः भवंति । वेदैर्वेदैश्चतुर्भिश्चतुर्भिर्विश्रामो भवतीति सा विद्युन्माला । तथाचोक्तं रत्नाकरे । मो मो गो गो विद्युन्माला ॥ १४॥ विद्युन्माला । च० अ० ८, ग० म, म; ग, ग; यतिः ४, ४ ॥

अथ दशाक्षरजातौ चंपकमालालक्षणमाह—

तन्वि गुरु स्यादाद्यचतुर्थं पंचमषष्ठं चांत्यमुपांत्यम् ।
इंद्रियबाणैर्यत्र विरामः सा कथनीया चंपकमाला १५

तन्वीति ॥ हे तन्वि तन्वंगि सा चंपकमाला कथनीया ।

सा का । यत्र यस्यां आद्यचतुर्थं प्रथमं चतुर्थं पंचमषष्ठं अंत्यं दशमं उपांत्यं नवमं एते गुरवो भवंति । यत्र इंद्रियबाणैः पंचभिः पंचभिरक्षरैर्विरामो विश्रामः । सा चंपकमाला कथनीया । आद्यचतुर्थे पंचमषष्ठं इत्येकले द्विगुद्वंद्वौ । इंद्रियाणि च बाणाश्च इंद्रियबाणास्तैः । तथाचोक्तं रत्नाकरे । चंपकमाला चेद्भ्मसागः ॥ १५ ॥ चंपकमाला । च० अ० १०, ग० भ, म, स; ग; यतिः ५, ५ ॥

अथ नवाक्षरजातौ मणिबंधलक्षणमाह–

चंपकमाला यत्र भवेदंत्यविहीना प्रेमनिधे ।
छंदसि दक्षा ये कवयस्तन्मणिबंधं ते ब्रुवते ॥१६॥

चंपकमालेति ॥ हे प्रेमनिधे छंदसि छंदोग्रंथे ये दक्षाः कुशलास्ते कवयस्तन्मणिबंधसंज्ञकं ब्रुवते । यत्रांत्यविहीना चंपकमाला भवेत् । चंपकमाला तु । दशाक्षरा इदं नवाक्षरं भवेत् । लक्षणं तु तदेव चंपकमालागतमेव तन्मणिबंधम् । प्रेमस्य निधिरिव निधिः तस्याः संबुद्धौ । अंत्यविहीनः अंते भवोंऽसो वर्णः तेन विहीना त्यक्ता भवेत् । तदुक्तं रत्नाकरे । भ्मौ सयुक्तौ रुक्मवती ॥ १६ ॥ मणिबंधम् । च० अ० ९, ग० भ, म, स; यतिः ५, ४ ॥

एकादशाक्षरजातौ शालिनीमाह–

ह्रस्वो वर्णो जायते यत्र षष्ठः
कंबुग्रीवे तद्वदेवाष्टमांत्यः ।
विश्रामः स्यात्तन्वि वेदैस्तुरंगै-
स्तां भाषंते शालिनीं छांदसीयाः ॥ १७ ॥ ×

ह्रस्व इति ॥ हे तन्वि कृशांगि छांदसीयाः छंदसि कु-

शलास्तां शालिनीं भाषंते। तां कां हे कंबुग्रीवे यत्र यस्यां षष्ठो वर्णो ह्रस्वः तद्वदष्टमांत्यः नवमः ह्रस्वो जायते। यत्र वेदैश्चतुर्भिस्तुरंगैः सप्तभिर्विश्रामस्तां शालिनीं भाषंते ब्रुवते। कंबोः शंखस्य ग्रीवावद्ग्रीवा यस्याः सा तत्संबुद्धौ। कंबुग्रीवा त्रिरेखा स्यादित्यमरः। तदुक्तं रत्नाकरे। शालिन्युक्ताम्तौ तगौ गो ॥ १७॥ शालिनी। चर० अ० ११, ग० म, त, त; ग, ग; यतिः ४, ७॥

चत्वारः प्राक्सुतनु गुरवो द्वादशैकादशौ चे-
न्मुग्धे वर्णौ तदनु कुमुदामोदिनि द्वादशांत्यौ।
तद्वच्चांत्यौ युगरसहयैर्यत्र कांते विरामो
मंदाक्रांतां प्रवरकवयस्तन्वि तां संगिरंते॥ १८॥

चत्वार इति॥ हे सुतनु सुष्ठु तनुः कायो यस्याः सा तस्याः संबोधनं हे सुतनु। प्रवरकवयः श्रेष्ठकवयः तां मंदाक्रांतां वदंति। तां कां चेद्यदि यत्र यस्यां प्रागादौ चत्वारो वर्णा गुरवो भवंति। हे मुग्धे च पुनः द्वादशैकादशौ वर्णौ गुरू भवतः। हे कुमुदामोदिनि च पुनः तदनु द्वादशांत्यौ त्रयोदशचतुर्दशौ वर्णौ गुरू भवतः। च पुनः अंत्यौ तद्वद्भवतः। हे कांते च पुनः युगरसहयैश्चतुःषट्सप्तभिः क्रमेण विरामो भवति प्रवरकवयस्तद्विदः॥ १८॥ मंदाक्रांता। च० अ० १७, ग० म, भ, न, त, त; ग, ग; यतिः ४, ६, ७॥

हंस्या लक्षणमाह—

मंदाक्रांतांत्ययतिरहिता सालंकारे भवति यदि सा।
तद्विद्भिर्ध्रुवमभिहिता ज्ञेया हंसी कमलवदने॥१९॥

मंदाक्रांतेति॥ हे कमलवदने तत्तदा ध्रुवं निश्चयेन हं-

सी ज्ञेया ज्ञातव्या । कमलवत्सौंदर्यं सौरभादिगुणैः कमलसदृशं वदनं मुखं यस्याः सा तत्संबोधनम् । कथंभूता हंसी विद्वद्भिः पंडितैरभिहिता कथिता । तदा कदा । हे सालंकारे यदि मंदाक्रांता अंत्ययतिरहिता अंते भवा अंत्या मंदाक्रांतायां युगरसहयैः विश्रामः सांत्यरहिता दशवर्णात्मिका सा हंसी ज्ञेया । लक्षणं मंदाक्रांताया एव । अलंकारेण आभूषणेन सह वर्तमाना सालंकारा तस्याः संबोधनं हे सालंकारे ॥ १९ ॥ हंसी । च० अ० १०, ग० म, भ, न; ग; यतिः ४, ६ ॥

अथ दोधकवृत्तलक्षणमाह—

आद्यचतुर्थमहीननितंबे सप्तमकं दशमं च तथांत्यम् ।
यत्र गुरु प्रकटस्मरसारे तत्कथितं ननु दोधकवृत्तम् २० ॥

आद्यचतुर्थमिति ॥ हे प्रकटस्मरसारे कविभिः तत् ननु दोधकवृत्तम् कथितं । प्रकटः स्मरसारः कामबलं यस्याः सा तस्याः संबोधनम् । हे अहीननितंबे अहीनौ स्थूलौ नितंबौ कटिपश्चाद्भागौ यस्याः सा तत्संबुद्धौ । यत्र यस्मिन् आद्यचतुर्थं प्रथमं चतुर्थं सप्तमकं सप्तमं दशमं तथा अंत्यं एकादशं एतानि अक्षराणि गुरूणि संति । तदुक्तं रत्नाकरे । दोधकवृत्तमिदं भभभागौः ॥ २० ॥ दोधकं । च० अ० ११, ग० भ, भ, भ; ग, ग ॥

अथेंद्रवज्रालक्षणमाह—

यस्यां त्रिषट्सप्तममक्षरं स्या-
द्ध्रस्वं सुजंघे नवमं च तद्वत् ।
गत्या विलज्जीकृतहंसकांते
तामिंद्रवज्रां ब्रुवते कवींद्राः ॥ २१ ॥

यस्यामिति ॥ हे गत्याविलज्जीकृतहंसकांते कवींद्रास्तामिंद्रवज्रां ब्रुवते । गत्या गमनेन विलज्जीकृता हंसस्य कांतिः शोभा यया सा तस्याः संबोधनम् । तां कां यस्यां त्रिषट्सप्तममक्षरं ह्रस्वं स्यात् तद्वन्नवमं ह्रस्वं स्यात् । हे सुजंघे तामिति संबंधः । एतादृशीं इंद्रवज्रां ब्रुवते । सुष्ठु शोभने जंघे यस्याः सा तत्संबुद्धौ । कवीनां कविषु वा इंद्राः पूज्या बृहस्पत्यादयः । तदुक्तं रत्नाकरे । स्यादिंद्रवज्रा यदि तौ जगौ गः॥२१॥ इंद्रवज्रा । च० अ० ११, ग० त, त, ज; ग, ग; यतिः ५, ६॥

अथोपेंद्रवज्रालक्षणमाह—

यदींद्रवज्राचरणेषु पूर्वे
भवंति वर्णा लघवः सुवर्णे ।
अमंदमाद्यन्मदने तदानी-
मुपेंद्रवज्रा कथिता कवींद्रैः ॥ २२ ॥

यदीति ॥ हे अमंदमाद्यन्मदने तदानीं कवींद्रैः यदींद्रवज्राचरणेषु पूर्वे वर्णा लघवः संति शेषमिंद्रवज्रावत् आद्यवर्णं ह्रस्वमेवेति शेषः । चतुर्ष्वपि पादेषु आद्यो ह्रस्वः । हे सुवर्णे सा उपेंद्रवज्रा कथिता । अमंदं बहुलं माद्यन् हर्षं कुर्वन्मदनो यस्यां सा तत्संबुद्धौ । तथा चोक्तं रत्नाकरे । उपेंद्रवज्रा जततजास्ततो गौ ॥ २२ ॥ उपेंद्रवज्रा । च० अ० ११, ग० ज, त, ज; ग, ग; यतिः ५, ६ ॥

उपजातिलक्षणमाह—

यत्र द्वयोरप्यनयोस्तु पादा
भवंति सीमंतिनि चंद्रकांते ।

विद्वद्भिराद्यैः परिकीर्तिता सा
प्रयुज्यतामित्युपजातिरेषा ॥ २३ ॥

यत्रेति ॥ हे चंद्रकांते सा एषा उपजातिरिति प्रयुज्यताम् । कथंभूता सा । आद्यैः पुरातनैर्विद्वद्भिः पंडितैः परिकीर्तिता कथिता । सा का हे सीमंतिनि । यत्र द्वयोरनयोरिंद्रवज्रोपेंद्रवज्रयोरपि पादाः यथाक्रमेण भवंति । प्रथमे तृतीये च इंद्रवज्रालक्षणं द्वितीये चतुर्थे च उपेंद्रवज्रालक्षणम् । सीमंतः केशवेशो विद्यते यस्याः सा तत्संबुद्धौ । चंद्रवत्कांतिर्यस्याः सा तत्संबुद्धौ पक्षे चंद्रवत्कांता कमनीया या सा तत्संबुद्धौ । तदुक्तं रत्नाकरे । अनंतरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः ॥ २३ ॥ उपजातिः । च० अ० ११, प्रथमे तृतीये च चरणे इंद्रवज्रा द्वितीये चतुर्थे चोपेंद्रवज्रेत्यर्थः ॥

अथाख्यानकीलक्षणमाह—

आख्यानकी स्यात्प्रक...
यदींद्रवज्राचरणः पुरस्...
उपेंद्रवज्राचरणास्त्रयोऽन्ये
मनीषिणोक्ता विपरीतपूर्वा

आख्यानकीति ॥ हे प्रकटीकृतार्थे मनीषिणा विदुषा यदि इंद्रवज्रावत्प्रथमचरणः स्यात् । अन्ये त्रयश्चरणा उपेंद्रवज्रावत्संति तदा विपरीतपूर्वाख्यानकी विपरीताख्यानकीत्यर्थः । प्रकटीकृतोऽर्थः कामलक्षणो यया सा तत्संबुद्धौ इयं वृत्तरत्नाकरे नोक्ता तथापि पिंगलादिभिराचार्यैर्हलायुधादावुक्तैव ॥ २४ ॥ आख्यानकी । च० अ० ११, प्रथमचरण इंद्रवज्रावत् अन्ये उपेंद्रवज्रावत् ॥

अथ रथोद्धतालक्षणमाह—

आद्यमक्षरमतस्तृतीयकं
सप्तमं च नवमं तथांतिमम् ।
दीर्घमिंदुमुखि यत्र जायते
तां वदंति कवयो रथोद्धताम् ॥ २५ ॥

आद्यमिति ॥ हे इंदुमुखि कवयः तां रथोद्धतां वदंति । कां यत्राद्यमक्षरमतस्तृतीयकं सप्तमं नवमं तथांतिमं एकादशं एते वर्णा दीर्घा द्विमात्रका जायंते । इंदुवन्मुखं यस्याः सा तत्संबुद्धौ । तदुक्तं रत्नाकरे । रान्नराविह रथोद्धता लगौ ॥२५॥ रथोद्धता। च० अ० ११, ग० र, न, र; ल, ग; यतिः ७, ४ ॥

स्वागताया लक्षणमाह—

अक्षरं च नवमं दशमं चे-
द्व्यत्ययाद्भवति यत्र विनीते ।
प्रोक्तमेणनयने यदि सैव
स्वागतेति कविभिः कथितासौ ॥ २६ ॥

अक्षरमिति॥ हे एणनयने सैषा रथोद्धता तदा कविभिः स्वागतेति कथिता । हे विनीते नम्रीभूते । यदि यत्र यस्यां व्यत्ययाद्वैपरीत्येन नवममक्षरं दशमवद्दशमं नवमवत् नवमो लघुः दशमो गुरुः द्वौ चकारौ विपरीतार्थसूचकौ । एणस्य नयने इव नयने यस्याः सा तस्याः संबुद्धौ । अयमर्थः । रथोद्धतायां नवमं अक्षरं गुरु भवति दशमं चाक्षरं लघु भवति । स्वागतायां तु नवममक्षरं लघु दशमं चाक्षरं गुरु भवतीति भावः । तदुक्तं रत्नाकरे । स्वागतेति रनभाद्गुरुयुग्मम् ॥ २६ ॥

स्वागता। च० अ० ११, ग० र, न, भ, ग, ग; यतिः ७, ४॥

अथ वैश्वदेवीलक्षणमाह—

ह्रस्वो वर्णः स्यात्सप्तमो यत्र बाले
तद्वद्बिंबोष्ठि न्यस्त एकादशाद्यः।
बाणैर्विश्रामस्तत्र चेद्वा तुरंगै-
र्नाम्ना निर्दिष्टा सुभ्रु सा वैश्वदेवी॥ २७॥

ह्रस्व इति॥ यत्र सप्तमो वर्णो ह्रस्वः स्यात्। हे बाले षोड-शवर्षाभ्यंतरवयस्के तद्वत्पूर्वोक्तप्रकारवत्। हे बिंबोष्ठि एकाद-शाद्यो दशमो वर्णो ह्रस्वः स्यात्। एवं न्यस्तः निक्षिप्तः स्या-च्चेद्यदि तत्र बाणैः पंचभिस्तुरंगैः सप्तभिश्च विश्रामः स्यात्। हे सुभ्रु सा नाम्ना वैश्वदेवी निर्दिष्टा कथिता। सुष्ठु भ्रुवौ यस्याः सा तस्याः संबुद्धौ। बिंबवदोष्ठौ यस्याः सा एकाद-शादौ जात एकादशाद्यः। तदुक्तं रत्नाकरे। पंचाश्वैश्छिन्ना वैश्वदेवी ममौ यौ॥ २७॥ वैश्वदेवी। च० अ० १२, ग० म, म, य, य; यतिः ५, ७॥

द्वादशाक्षरजातौ तोटकलक्षणमाह—

सतृतीयकषष्ठमनंतरते
नवमं विरतिप्रभवं गुरु चेत्।
घनपीनपयोधरभारनते
ननु तोटकवृत्तमिदं कथितम्॥ २८॥ ×

सतृतीयकेति॥ हे घनपीनपयोधरभारनते ननु इह निश्चितं तोटकवृत्तं कथितं वर्णितम्। चेद्यदि हे अनंतरते स-तृतीयकं षष्ठं नवमं गुरु स्यात्तृतीयं षष्ठं च तृतीयषष्ठे ताभ्यां सह वर्तत इति। कीदृशं विरतिप्रभवं अंत्यं द्वादशं गुरु स्यात्।

अनंता अपरिमिता रतिर्यस्याः सा अनंतरता तत्संबुद्धौ । घनौ च पीनौ च घनपीनौ कठिननिबिडौ पयोधरौ च तयोर्भारः आधिक्यं तेन नता नम्रीभूता या सा तत्संबुद्धौ । विरते प्रभव उत्पत्तिर्यस्य तत्तथोक्तम् । तदुक्तं रत्नाकरे । इह तोटकमंबुधिसैः कथितम् ॥ २८ ॥ तोटकम् । च० अ० १२, ग० स, स, स, स; यतिः ६, ६ ॥

भुजंगप्रयातलक्षणमाह—

यदाद्यं चतुर्थं तथा सप्तमं चे-
त्तथैवाक्षरं ह्रस्वमेकादशाद्यम् ।
शरच्चंद्रविद्वेषिवक्त्रारविंदे
तदुक्तं कवींद्रैर्भुजंगप्रयातम् ॥ २९ ॥

यदाद्यमिति ॥ हे शरच्चंद्रविद्वेषिवक्त्रारविंदे कवींद्रैस्तच्छंदो भुजंगप्रयातमुक्तं कथितम् । किंच चेद्यदा आद्यं प्रथमं तथा चतुर्थं तथा सप्तमं एव निश्चितं एकादशाद्यं एकादशस्यादिभूतं दशममक्षरं ह्रस्वं स्यादिति संबंधः । शरदः चंद्रः शरच्चंद्रः तस्य विद्वेषि वक्त्रमेवारविंदं यस्याः सा तत्संबुद्धौ । तदुक्तं रत्नाकरे । भुजंगप्रयातं भवेद्यैश्चतुर्भिः ॥ २९ ॥ भुजंगप्रयातम् । च० अ० १२, ग० य, य, य, य; यतिः ६, ६ ॥

द्रुतविलंबितलक्षणमाह—

अयि कृशोदरि यत्र चतुर्थकं
गुरु च सप्तमकं दशमं तथा ।
विरतिजं च तथैव विचक्षणै-
र्द्रुतविलंबितमित्युपदिश्यते ॥ ३० ॥ ×

अयि कृशोदरीति ॥ अयि कोमलालापे । विचक्षणैः

पंडितैर्द्रुतविलंबितमित्युपदिश्यते इति किं। हे कृशोदरि यत्र चतुर्थकं चेत्सप्तमकं तथा दशमं इमान्यक्षराणि गुरूणि सन्ति। विरतिजं अंत्यं द्वादशं गुरु स्यादित्यर्थः। कृशमुदरं यस्याः सा कृशोदरी तत्संबुद्धौ। तदुक्तं रत्नाकरे। द्रुतविलंबितमाह नभौ भरौ॥ ३०॥ द्रुतविलंबितम्। च० अ० १२, ग० न, भ, भ, र॥

प्रमिताक्षरालक्षणमाह—

यदि तोटकस्य गुरु पंचमकं
विहितं विलासिनि तदक्षरकम्।
रससंख्यकं गुरु न चेदबले
प्रमिताक्षरेति कविभिः कथिता॥ ३१॥

यदि तोटकस्येति॥ हे अबले कविभिः प्रमिताक्षरा इति कथिता। किं हे विलासिनि यदि तोटकस्य उक्तलक्षणकस्य पंचमकं वर्णं गुरु विहितं स्यात्। रससंख्यं षष्ठं गुरु न चेत् गुरु तु पंचममेव। सा प्रमिताक्षरेत्यर्थः। विलासो विभ्रमो यस्याः सा विलासिनी तत्संबुद्धौ। तदुक्तं रत्नाकरे। प्रमिताक्षरा सजससैरुदिता॥ ३१॥ प्रमिताक्षरा। च० अ० १२, ग० स, ज, स, स॥

अथ हरिणीप्लुतालक्षणमाह—

प्रथमाक्षरमाद्यतृतीययो-
र्द्रुतविलंबितकस्य च पादयोः।
यदि चेन्न तदा कमलेक्षणे
भवति सुंदरि सा हरिणीप्लुता॥ ३२॥

प्रथमाक्षरमिति॥ हे कमलेक्षणे सुकविभिः तदेयं हरि-

णीप्लुता कथिता । यदि द्रुतविलंबितकस्य छंदसः आद्यतृतीययोः पादयोः प्रथमाक्षरं चेत् एकादशाक्षरमेवं विषमपादयोः तदेयं हरिणीप्लुता । कमलवदीक्षणे यस्याः सा तत्संबुद्धौ हेसुंदरि शुभांगे । तदुक्तं रत्नाकरे १, ३; सौ स्लौ गः । २, ४; भ्रौ भ्रौ । पक्षे हरिणीप्लुता ॥ ३२ ॥ हरिणीप्लुता । च० १, ३; अ० ११, ग० स, स; स; ल, ग । च० २, ४; अ० १२, ग० न, भ, भ, र ॥

वंशस्थलक्षणमाह—

उपेंद्रवज्रा चरणेषु संति चे-
दुपांत्यवर्णा लघवः कृता यदा ।
मदोल्लसद्भ्रूजितकामकार्मुके
वदंति वंशस्थमिदं बुधास्तदा ॥ ३३ ॥

उपेंद्रवज्रेति ॥ हे मदोल्लसद्भ्रूजितकामकार्मुके तदा बुधा इदं वंशस्थं वदंति । तदा कदा । यदा उपेंद्रवज्राचरणेषु उपांत्यवर्णाः अंत्यसमीपस्था वर्णा एकादशसंज्ञका लघवः संति प्रतिचरणे एकादशो वर्णो लघुस्तदा वंशस्थम् । मदेन उल्लसंतौ भ्रुवौ ताभ्यां जितं कामकार्मुकं मदनधनुर्यया सा तत्संबुद्धौ ॥ अंत्यस्य समीपमुपांत्यम् । उपांत्ये भवा उपांत्याः । उपांत्याश्च ते वर्णाश्चेति । तदुक्तं रत्नाकरे । जतौ तु वंशस्थमुदीरितं जरौ ॥ ३३ ॥ वंशस्थम् । च० अ० १२, ग० ज, त, ज, र; यतिः ५, ७ ॥

इंद्रवंशालक्षणमाह—

यस्यामशोकांकुरपाणिपल्लवे
वंशस्थपादा गुरुपूर्ववर्णकाः ।

तारुण्यहेलारतिरंगलालसे
तामिंद्रवंशां कवयः प्रचक्षते ॥ ३४ ॥

यस्यामशोकेति ॥ हे तारुण्यहेलारतिरंगलालसे कवयो यस्यां वंशस्थपादा गुरुपूर्ववर्णका भवंति । हे अशोकांकुरपाणिपल्लवे तामिंद्रवंशां प्रचक्षते ब्रुवते । अशोकांकुरवत्पाणिपल्लवौ यस्याः सा । तारुण्यस्य हेलास्ताभी रतिरंगे लालसा अभिलाषो यस्याः सा तत्संबुद्धौ । तदुक्तं रत्नाकरे । स्यादिंद्रवंशा तौ ज्रौ ॥ ३४ ॥ इंद्रवंशा । च० अ० १२, ग० त, त, ज, र; यतिः ॥ ५, ७ ॥

त्रयोदशारक्षजातौ प्रभावतीलक्षणमाह—

यस्यां प्रिये प्रथमकमक्षरद्वयं
तुर्यं तथा गुरु नवमं दशांतिकम् ।
सांत्यं भवेद्यदि विरतिर्युगग्रहैः
सा लक्षिता ह्यमृतलते प्रभावती ॥ ३५ ॥

यस्यामिति ॥ हे अमृतलते यस्यां प्रथममक्षरद्वयं तुर्यं तथा चतुर्थं तथा नवमं दशांतिकं दशसहितं त्रयोदशं वर्णं युगग्रहैश्चतुर्भिर्नवभिश्चाक्षरैर्विरतिः सा प्रभावती लक्षिता कथिता । अमृतस्य लतेव लता या सा तत्संबुद्धौ ॥ ३५ ॥ प्रभावती । च० अ० १३, ग० ज़, भ, स, ज, ग; यतिः ४, ९ ॥

अथ प्रहर्षिणीलक्षणमाह—

आद्यं चेत्त्रितयमथाष्टमं नवांत्यं
द्वे चांत्ये गुरुविरतौ सुभाषिते स्यात् ।

विश्रामो भवति महेशनेत्रदिग्भि-
र्विज्ञेया ननु सुभगे प्रहर्षिणी सा ॥ ३६ ॥

आद्यमिति ॥ हे सुदति ननु इति निश्चितं आद्यं त्रितयं प्रथमतः वर्णत्रयं अथाऽष्टमं नवांत्यं दशमं चांत्ये द्वे द्वादशत्रयोदशाख्ये एते गुरवो भवंति । हे सुभाषिते महेशनेत्रैर्वर्णत्रयानंतरं दिग्भिर्दशवर्णानंतरं च विश्रामः स्यात् सा प्रहर्षिणी विज्ञेया ज्ञातव्या । सुशोभनं भाषणं यस्याः सा । सुशोभना दंता यस्याः सा सुदती तत्संबुद्धौ । तदुक्तं रत्नाकरे । म्नौ ज्रौगस्त्रिदशयतिः प्रहर्षिणीयम् ॥ ३६ ॥ प्रहर्षिणी । च० अ० १३, ग० म, न, ज, र; ग; यतिः ३, १० ॥

चतुर्दशाक्षरजातौ वसंततिलकालक्षणमाह—

आद्यं द्वितीयमपि चेद्गुरु तच्चतुर्थं
यत्राष्टमं च दशमांत्यमुपांत्यमंत्यम् ।
कामांकुशांकुशितकामिमतंगजेंद्रे
कांते वसंततिलकां किल तां वदंति ॥३७॥

आद्यमिति ॥ हे कामांकुशांकुशितकामिमतंगजेंद्रे यत्र आद्यं प्रथमं द्वितीयमपि गुरु चतुर्थं दशमांत्यं एकादशमुपांत्यं त्रयोदशं अंत्यं चतुर्दशं एते गुरवः स्युः हे कांते बुधास्तां वसंततिलकां वदंति । काम एवांकुशस्तेनांकुशिता वशीकृताः कामिन एव मतंगजेंद्रा यया सा तत्संबुद्धौ । तदुक्तं रत्नाकरे । उक्ता वसंततिलका तभजा जगौ गः ॥ ३७ ॥ वसंततिलका । च० अ० १४, ग० त, भ, ज, ज; ग, ग ॥

पंचदशाक्षरजातौ मालिनीलक्षणमाह—

प्रथममगुरुषट्कं विद्यते यत्र कांते
तदनु च दशमं चेदक्षरं द्वादशांत्यम् ।

गिरिभिरथ तुरंगैर्यत्र कांते विरामः
सुकविजनमनोज्ञा मालिनी सा प्रसिद्धा ३८

प्रथममिति ॥ हे कांते यत्र प्रथमं षट्कमगुरु लघ्वेव भवति तदनु दशमं द्वादशांत्यं त्रयोदशं च लघु । गिरिभिरथ तुरंगैरष्टभिः सप्तभिश्च विरामस्तदा सुकविजनमनोज्ञा मालिनी सा प्रसिद्धा कृता । तदुक्तं रत्नाकरे । ननमयययुतेयं मालिनी भोगिलोकैः ॥ ३८ ॥ मालिनी । च० अ० १५, ग० न, न, म, य, य; यतिः ८, ७ ॥

सप्तदशाक्षरजातौ हरिणीलक्षणमाह–

सुमुखि लघवः पंच प्राच्यास्ततो दशमांतिकं
तदनु ललितालापे वर्णौ यदि त्रिचतुर्दशौ ।
प्रभवति पुनर्यत्रोपांत्यः स्फुरत्करकंकणे
यतिरपि रसैर्वेदैरश्वैः स्मृता हरिणीति सा ॥ ३९ ॥

सुमुखीति ॥ हे स्फुरत्करकंकणे यत्र प्राच्याः प्रथमाः पंचवर्णा लघवः संति । ततो दशमांतिक एकादशः हे ललितालापे यदि त्रिचतुर्दशौ त्रयोदशचतुर्दशौ लघू स्यातां उपांत्यः षोडशोऽपि लघुः । रसैः षड्भिर्वेदैश्चतुर्भिरश्वैः सप्तभिश्च विरामः स्यात्तदा सा हरिणी स्मृता । स्फुरंति करयोः कंकणानि यस्याः सा । ललित आलापो यस्याः सा । उक्तं च रत्नाकरे । रसयुगहयैर्न्सौ म्रौ स्लौ गो यदा हरिणी तदा ॥ ३९ ॥ च० अ० १७, ग० न, स, म, र, स; ल, ग; यतिः ६, ४, ७ ॥

अथ शिखरिणीलक्षणमाह–

यदा पूर्वो ह्रस्वः कमलनयने षष्ठकपरा-
स्ततो वर्णाः पंच प्रकृतिसुकुमारांगि लघवः ।

त्रयोऽन्ये चोपांत्याः सुतनुजघनाभोगसुभगे×
रसै रुद्रैर्यस्यां भवति विरतिः सा शिखरिणी॥४०॥

यदा पूर्वौ ह्रस्व इति ॥ हे सुतनुजघनाभोगसुभगे यदा पूर्वौ वर्णौ ह्रस्वो भवति। हे प्रकृतिसुकुमारांगि ततः षष्ठकपराः षष्ठतः पंच वर्णाः सप्तमाष्टमनवमदशमैकादशा लघवः संति। अन्ये उपांत्यास्त्रयो वर्णाश्चतुर्दशपंचदशषोडशा लघवो भवंति। यस्यां रसैः षड्भी रुद्रैरेकादशैर्विरतिर्भवेत् । हे सुतनु सा शिखरिणी कथिता। कमलवन्नयने यस्याः सा। प्रकृत्या स्वभावेन सुकुमाराण्यंगानि यस्याः। जघनयोराभोगस्तेन सुभगा। सुशोभना तनुर्यस्याः सा तत्संबुद्धौ। तदुक्तं रत्नाकरे । रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी॥ ४०॥ शिखरिणी। च० अ० १७, ग० य, म, न, स, भ; ल, ग; यतिः ६, ११॥

पृथ्वीलक्षणमाह–

द्वितीयमलिकुंतले यदि षडष्टमं द्वादशं
चतुर्दशमथ प्रिये गुरु गभीरनाभिह्रदे ।
सपंचदशमंतिकं तदनु यत्र कांते यति- ×
र्गिरींद्रफणिभृत्कुलैर्भवति सुभ्रु पृथ्वी हि सा॥४१॥

द्वितीयमिति॥ हे सुभ्रु यदि द्वितीयसंख्याकं गुरु स्यात् हे अलिकुंतले षष्ठमष्टमं च गुरु हे प्रिये द्वादशमथ चतुर्दशं गुरु हे गभीरनाभिह्रदे पंचदशेन सहितमंतिकं गुरु स्यात् । हे कांते यत्र गिरीन्द्रैरष्टभिः फणिभृत्कुलैर्नवभिश्च यतिः स्यात्सा पृथ्वीनामकं वृत्तं भवति। अलिवद्भ्रमरवच्छ्यामाः कुंतला अलका यस्याः सा। गंभीरा निम्ना नाभिरेव ह्रदो यस्याः सा तत्संबुद्धौ। तदुक्तं रत्नाकरे। जसौ जसयला वसुग्रहयतिश्च पृथ्वी

गुरुः ॥ ४१ ॥ पृथ्वी । च० अ० १७, ग०ज, स, ज, स, य; ल, ग; यतिः ८, ९ ॥

मंदाक्रांतालक्षणमाह—

चत्वारः प्राक् सुतनु गुरवो द्वादशैकादशौ चे-
न्मुग्धे वर्णौ तदनु कुमुदामोदिनि द्वादशांत्यौ ।
तद्वचांत्यौ युगरसहयैर्यत्र कांते विरामो
मंदाक्रांतां प्रवरकवयस्तन्वि तां संगिरंते ॥ ४२ ॥

चत्वार इति ॥ हेतन्वि प्रवरकवयो यत्र प्राक् चत्वारो वर्णा गुरवः स्युः हे कुमुदामोदिनि चेद्वर्णौ द्वादशैकादशौ गुरू स्तः हे मुग्धे द्वादशांत्यौ द्वादशस्यांतस्थितौ त्रयोदशचतुर्दशौ गुरू स्यातां अंत्यौ षोडशसप्तदशौ तद्वद्गुरू युगरसहयैर्विरामः एतादृशीं तां मंदाक्रांतां संगिरंते । कुमुदवदामोदः सुगंधिर्य-स्याः सा । तथोक्तं रत्नाकरे । मंदाक्रांता जलधिषडगैम्भौं नतौ ताद्गुरू चेत् ॥ ४२ ॥ मंदाक्रांता । च० अ० १७, ग० म, भ, न, त, त; ग, ग; यतिः ४, ६, ७ ॥

एकोनविंशतिजातौ शार्दूलविक्रीडितमाह—

आद्याश्चेद्गुरवस्त्रयः प्रियतमे षष्ठस्तथा चाष्टमो
नन्वेकादशतस्त्रयस्तदनु चेदष्टादशाद्यौ ततः ।
मार्तंडैर्मुनिभिश्च यत्र विरतिः पूर्णेंदुबिंबानने
तद्वृत्तं प्रवदंति काव्यरसिकाः शार्दूलविक्रीडतम् ४३

आद्या इति ॥ हे पूर्णेंदुबिंबानने काव्यरसिकास्तद्वृत्तं शार्दूलविक्रीडितं वदंति । यत्राद्यास्त्रयो गुरवः षष्ठस्तथाऽष्टमः गुरुः । ननु एकादशतस्त्रयः द्वादशत्रयोदशचतुर्दशा गुरवः ततश्चेदष्टा-

दशस्याद्यौ षोडशसप्तदशौ गुरू स्याताम् । यत्र मार्तंडैर्मुनिभिर्द्वादशसप्तभिर्विरतिः हे प्रियतमे तदेतच्छार्दूलविक्रीडितं । पूर्णश्चासाविंदुस्तस्य बिंबवदाननं यस्याः सा अतिशयेन प्रिया प्रियतमा तस्याः संबुद्धौ । तदुक्तं रत्नाकरे । सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् ॥४३॥ शार्दूलविक्रीडितम् । च० अ० १९, ग० म, स, ज, स, त, त; ग, यतिः १२, ७ ॥

एकविंशत्यक्षरजातौ स्रग्धरालक्षणं—

चत्वारो यत्र वर्णाः प्रथममलघवः षष्ठकः सप्तमोऽपि द्वौ तद्वत्षोडशाद्यौ मृगमदमुदिते षोडशांत्यौतथांत्यौ । रंभास्तंभोरुकांते मुनिमुनिमुनिभिर्दृश्यते चेद्विरामो बाले वंद्यैः कवींद्रैः सुतनु निगदिता स्रग्धरा सा प्रसिद्धा ॥ ४४ ॥ इति कविकालिदासकृतः श्रुतबोधनामकश्छंदोग्रंथः समाप्तः ॥

चत्वार इति ॥ हे सुदति वंद्यैः पूज्यैः कवींद्रैः प्रसिद्धा इयं स्रग्धरा गदिता । यत्र प्रथमं चत्वारो वर्णा अलघवो गुरवः संति षष्ठकः सप्तमोऽपि तद्वद्गुरुः । षोडशाद्यौ चतुर्दशपंचदशौ तथांत्यौ सप्तदशाष्टादशौ गुरू स्याताम् । मुनिमुनिमुनिभिर्विरामः । हे रंभास्तंभोरुकांते हे बाले इयं स्रग्धरा प्रसिद्धा मृगस्य मदेन मुदिता सा । रंभायाः स्तंभवदूर्वोः कांतिर्यस्याः सा । सुशोभना दंता यस्याः सा तत्संबुद्धौ । तदुक्तं रत्नाकरे । म्रौ भ्नौ यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम् ॥ ४४ ॥ स्रग्धरा । च० अ० २१, ग० म, र, भ, न, य, य, य; यतिः ७, ७, ७॥ इति श्रीश्रुतबोधनामकस्य छंदोग्रंथस्य व्याख्या समाप्ता ॥

गणनामदेवताफलानि ॥

मो भूमिः श्रियमातनोति य जलं वृद्धिं र चाग्नि-मूर्तिं सो वायुः परदेशदूरगमनं त व्योमशून्यं फ-लम् ॥ जः सूर्यो रुजमाददाति विपुलं भेंदुर्यशो निर्मलं नो नाकश्च सुखप्रदः फलमिदं प्राहुर्गणा-नां बुधाः ॥ १ ॥ अथ गणसंख्यानामरूपदेवता-फलादिज्ञापकं यंत्रम् ॥

	गणनाम	रूपम्	देवता	फलम्	मित्रादि	फलम्
१	मगणः	SSS	मही	लक्ष्मीः	मित्रम्	शुभम्
२	नगणः	।।।	स्वर्गः	बुद्धिः	मित्रम्	शुभम्
३	भगणः	S।।	शशी	यशः	दासः	शुभम्
४	यगणः	।SS	जलम्	आयुः	दासः	शुभम्
५	जगणः	।S।	रविः	रुजम्	उदासः	अशुभम्
६	रगणः	S।S	अग्निः	दाहः	शत्रुः	अशुभम्
७	सगणः	।।S	वायुः	विदेशः	शत्रुः	अशुभम्
८	तगणः	SS।	नभः	शून्यम्	उदासः	अशुभम्

श्रीः

श्रीपव्येकसूनुकेदारप्रणीतः

वृत्तरत्नाकरः ।

सुखसंतान सिद्ध्यर्थं नत्वा ब्रह्माच्युतार्चितम् ।
गौरीविनायकोपेतं शंकरं लोकशंकरम् ॥ १ ॥

तेन केदारेणेदं छंदः क्रियते । किं कृत्वा शंकरं नत्वा किमर्थं नत्वा सुखसंतानसिद्ध्यर्थं सुखस्य संतानमविच्छेदस्तस्य सिद्धिर्निष्पत्तिस्तदर्थं नत्वा । अथ सुखं च संतानश्च सिद्धयश्च सुखसंतानसिद्धयः तदर्थं नत्वा सुखमात्यंतिकं मोक्षलक्षणं संतानः पुत्रपौत्रादिः सिद्धयोऽणिमादयस्तदर्थं तेन केदारेणेदं वृत्तरत्नाकरं नाम छंदः क्रियते इति संबंधः । किंविशिष्टं शंकरं । ब्रह्मा च अच्युतश्च ब्रह्माच्युतौ ताभ्यामर्चितं पूजितं । पुनः किंविशिष्टं गौरीविनायकोपेतं गौरी च विनायकश्च गौरीविनायकौ ताभ्यामुपेतं सहितं । पुनः किंविशिष्टं लोकशंकरं लोकानां शं सुखं करोतीति लोकशंकरम् ॥ १ ॥

वेदार्थशैवशास्त्रज्ञः पव्येकोऽभूद्द्विजोत्तमः ।
तस्य पुत्रोऽस्ति केदारः शिवपादार्चने रतः ॥ २ ॥

वेदार्थश्च शैवशास्त्राणि च जानातीति वेदार्थशैवशास्त्रज्ञः एवंविधः पव्येको नाम द्विजोत्तमोऽभूज्जातस्तस्य पुत्रः केदा-

रोस्ति । स किंविशिष्टः शिवपादार्चने रतः। शिवस्य ईश्वरस्य पादौ शिवपादौ तयोरर्चनं पूजनं तस्मिन् शिवपादार्चने रत आसक्तः ॥ २ ॥

तेनेदं क्रियते छंदो लक्ष्यलक्षणसंयुतम् ।
वृत्तरत्नाकरं नाम बालानां सुखबुद्धये ॥ ३ ॥

किंविशिष्टं छंदः । लक्ष्यलक्षणसंयुतं लक्ष्यमुदाहरणं च लक्षणं छंदःस्वरूपकथनं च लक्ष्यलक्षणे ताभ्यां संयुतम् । अन्येषु रामशर्मादिषु छंदःशास्त्रेषु लक्षणं सूत्रमेवास्ति लक्ष्यं प्रयोगो नास्ति एतत्पुनरुभाभ्यामिव युक्तम् । वृत्तान्येव श्रीप्रभृतीनि रत्नानि तेषामाकरं वृत्तरत्नाकरं नाम । कस्मै बालानामनधीतछंदःशास्त्राणां सुखावबोधाय ॥ ३ ॥

त्रिभिर्विशेषकम् ।
पिंगलादिभिराचार्यैर्यदुक्तं लौकिकं द्विधा ।
मात्रावर्णविभेदेन छंदस्तदिह कथ्यते ॥ ४ ॥

यत्पिंगलादिभिराचार्यैर्लौकिकं छंदो द्विधोक्तं मात्राकारेण वर्णविभागेन च तदिहास्मिन् ग्रंथे छंदः कथ्यते । लोके भवं लौकिकं न पुनर्वैदिकं काव्यादिष्वनुपयोगात् ॥ ४ ॥

षडध्यायनिबद्धस्य छंदसोऽस्य परिस्फुटम् ।
प्रमाणमपि विज्ञेयं षट्त्रिंशदधिकं शतम् ॥ ५ ॥

अस्य छंदसः प्रमाणमपि परिस्फुटं परिसमंतात्प्रकटं विज्ञेयं ज्ञातव्यम् । किंविशिष्टस्य छंदसः। षट् च तेऽध्यायाश्च षडध्यायास्तैर्निबद्धं तस्य किं प्रमाणं शतम् । किंविशिष्टं शतं षट्त्रिंशताधिकम् ॥ ५ ॥

म्यरस्तजभ्नगैर्लांतैरेभि

समस्तं वाङ्मयं व्याप्तं त्रैलोक्यमिव विष्णुना ॥ ६ ॥

एभिर्दशभिरक्षरैः सकलं वाङ्मयं वाग्जालं व्याप्तं कुक्षीकृतम् । किमिव त्रैलोक्यमिव । केन विष्णुना नारायणेन । एभिः कैः म्यरस्तजभ्नगैः लांतैः ॥ ६ ॥

इदानीं तेषामक्षराणां लक्षणमाह—

सर्वगुर्मो मुखांतलौ यरावंतगलौ सतौ ।
ग्मध्याद्यौ ज्भौ त्रिलो नोष्टौ भवंत्यत्र गणास्त्रिकाः ७

सर्वगुरुर्मः मगणः ऽऽऽमुखे आदौ अंतर्मध्ये लो लघुर्ययोस्तौ मुखांतलौ यगणरगणौ । मुखलघुर्यगणः।ऽऽ मध्यलघू रगणः ऽ।ऽ अंते अवसाने गुरुर्लघुश्च ययोस्तौ अंतगलौ सतौ सगणतगणौ अंतगुरुः सगणः ।।ऽ अंतलघुस्तगणः ऽऽ । गुरुर्मध्ये आद्ये ययोस्तौ ज्भौ जगणभगणौ मध्यगुरुर्जगणः ।ऽ। आदिगुरुर्भगणः ऽ।। त्रीणि लघूनि यस्य सः त्रिलघुर्नगणः ।।। अत्रास्मिन् छंदसि अष्टौ गणास्त्रिकास्त्र्यवयवा भवंति ॥ ७ ॥

ज्ञेयाः सर्वांतमध्यादिगुरवोऽत्र चतुष्कलाः ।
गणाश्चतुर्लघूपेताः पंचार्यादिषु संस्थिताः ॥८॥

आर्यादिषु स्थिताः पंच गणा ज्ञेयाः । गणाः किंविशिष्टाः चतुष्कलाः चतुर्मात्राः ते के पंच गणाः सर्वांतमध्यादिगुरवः सर्वश्च अंतश्च मध्यश्च आदिश्च ते गुरवो येषां ते सर्वांतमध्यादिगुरवः किंभूतास्ते लघूपेताः पंचमो गणश्चतुर्लघुस्तेनोपेता युक्ताः । स्थापना चैषां । सर्वगुरुः ऽऽऽ अंत्यगुरुः ॥ऽ मध्यगुरुः ।ऽ। आदिगुरुः ऽ॥ चतुर्लघुः ।।।। इति ॥ ८ ॥

सानुस्वारो विसर्गांतो दीर्घो युक्तपरश्च सः ।
वा पादांते त्वसौ ग्वक्रो ज्ञेयोऽन्यो मात्रको ल्ऋजुः ९

सानुस्वारः सह अनुस्वारेण वर्तत इति सानुस्वरः विसर्गांतः विसर्गः अंते यस्य सः विसर्गांतः दीर्घः युक्तपरः युक्तं संयोगाक्षरं परं यस्मात्स युक्तपरः एतादृशः वर्णः वा विकल्पेन पादांते गुरुर्भवति । असौ गुरुस्तु पुनः स च प्रस्तारे वक्रो ज्ञेयः । अन्यो अस्माद्विपरीतो मातृकः एकमातृकः स च प्रस्तारे ऋजुः पंचलघुर्भवति । गुरुः ऽ लघुः । ॥ ९ ॥

पादादाविह वर्णस्य संयोगः क्रमसंज्ञकः ।
पुरःस्थितेन तेन स्याल्लघुतापि क्वचिद्गुरोः ॥ १० ॥

इह छन्दसि पादादौ वर्णस्य संयोगः क्रमसंज्ञकः स्यात्तेन वर्णस्य संयोगेन पुरःस्थितेन अग्रस्थितेन क्वचित् गुरोरपि लघुता स्यात् ॥ १० ॥

इदमस्योदाहरणम् ।

अस्योदाहरणं दर्शयति—

तरुणं सर्षपशाकं नवौदनं पिच्छलानि च दधीनि ।
अल्पव्ययेन सुंदरि ग्राम्यजनो मिष्टमश्नाति ॥११॥

हे सुंदरि स्तोकद्रव्येण ग्राम्यजनो मिष्टं मधुरमश्नाति भुंक्ते कं तरुणमभिनवं सर्षपशाकं नवांकुरम् पिच्छलानि चिक्कणानि दधीनि दुग्धं च । अत्रार्यायां ग्रा इत्येतेन पादादिस्थितेन सुंदरि इत्येतस्य यदि गुरुत्वं क्रियते तदा युक्तपरत्वात्पंचकलो भवति चतुर्मात्रागणाः आर्यायाः कर्तव्याः तस्माच्छंदःकरणाय क्वचिद्गुरोरपि लघुत्वं भवतींति ॥ ११ ॥

अब्धिभूतरसादीनां ज्ञेया संज्ञात्र लोकतः ।
ज्ञेयः पादश्चतुर्थोऽशो यतिर्विच्छेदसंज्ञिका ॥१२॥

उत्तरत्र अंकैः संज्ञामाह ॥ अब्धयः समुद्राश्चत्वारः ४ भूतानि पंच महद्भूतानि ५ रसाः षट् ६ आदिशब्दग्रहणेन अश्वाः मुनयश्च सप्त ७ अष्टौ पर्वताः वसवश्च ८ नव ग्रहाः रंध्राणि च ९ दश दिशः १० एकादश रुद्राः ११ द्वादश सूर्याः १२ त्रयोदश विश्वेदेवाः १३ चतुर्दश भुवनानि १४ इत्यादयो गृह्यंते । एताः संज्ञा लोकतः पूर्वाचार्येभ्योऽवगंतव्याः ज्ञेयाः। चतुर्थः अंशः पादो ज्ञेयः । यतिर्विरतिः किं कथ्यते विच्छेदसंज्ञिका ॥ १२ ॥

युक्समं विषमं चायुक्स्थानं सद्भिर्निगद्यते ।
सममर्धसमं वृत्तं विषमं च तथा परम् ॥ १३ ॥

सद्भिः सत्पुरुषैः समं स्थानं युङ्निगद्यते । विषमं स्थानमयुङ्निगद्यते । समं वृत्तं भवति । अर्धसमं तथा परं विषमं भवति ॥ १३ ॥

तल्लक्षणमाह—

अंघ्रयो यस्य चत्वारस्तुल्यलक्षणलक्षिताः ।
तच्छंदःशास्त्रतत्त्वज्ञाः समं वृत्तं प्रचक्षते ॥ १४ ॥

यस्य वृत्तस्यांघ्रयः पादाश्चत्वारस्तुल्यलक्षणलक्षिता भवंति तद्वृत्तं छंदःशास्त्रतत्त्वज्ञाः समं वृत्तं प्रचक्षते वदंति ॥ १४ ॥

प्रथमांघ्रिसमो यस्य तृतीयश्चरणो भवेत् ।
द्वितीयस्तुर्यवद्वृत्तं तदर्धसममुच्यते ॥ १५ ॥

यस्य वृत्तस्य प्रथमपादस्तृतीयपादेन समो भवेत् द्वितीय पादश्चतुर्थपादवत्तद्वृत्तमर्धसमं भवेत् ॥ १५ ॥

यस्य पादचतुष्केऽपि लक्ष्म भिन्नं परस्परम् ।
तदाहुर्विषमं वृत्तं छंदःशास्त्रविशारदाः ॥ १६ ॥

यस्य पादचतुष्टयेऽपि परस्परं लक्षणं भिन्नं भेदयुक्तं भवति तद्विषमं वृत्तं छंदःशास्त्रविशारदा आहुः कथयंति ॥ १६ ॥

आरभ्यैकाक्षरात्पादादेकैकाक्षरवर्धितैः ।
पृथक्छंदो भवेत्पादैर्यावत्षड्विंशतिं गतम् ॥ १७ ॥

एकैकाक्षरात्पादादारभ्य आदौ कृत्वैकैकमक्षरं वर्धितं येषु पादेषु ते एकैकाक्षरवर्धितास्तैरेकैकाक्षरवर्धितैः पादैः पृथक् छंदो भवेत् । पादैरित्थंभूतैर्यावत् षड्विंशतिं गतम् । तथा च प्रथमजातावुक्तायां चत्वारोऽप्येकाक्षराः पादा भवंति । अत्युक्तजातौ चत्वारोऽपि द्व्यक्षराः पादा भवंति । इत्थं यावत् यथा वृत्तावृत्तयोश्चत्वारोऽपि पादाः षड्विंशतिवर्णप्रमाणा भवंति ॥ १७ ॥

तदूर्ध्वं चंडवृष्ट्यादिदंडकाः परिकीर्तिताः ।
शेषं गाथा त्रिभिः षड्भिश्चरणैश्चोपलक्षिता ॥१८॥

तस्याः षड्विंशत्यक्षरजातेरूर्ध्वं चण्डवृष्टिरादिर्येषां ते चंडवृष्ट्यादिदण्डकाः परिसमंतात्कीर्तिताः कथिताः । उक्तान्यच्छन्दःशेषं सा गाथा । सा च त्रिभिः षड्भिर्वा चरणैः पादैरुपलक्षिता चिह्निता भवति ॥ १८ ॥

इदानीं छंदोजातीरुद्दिशन्नाह—

उक्तात्युक्ता तथा मध्या प्रतिष्ठान्या सुपूर्विका ।
गायत्र्युष्णिगनुष्टुप् च बृहती पंक्तिरेव च ॥ १९ ॥

उक्ता १ अत्युक्ता २ मध्या ३ प्रतिष्ठा ४ अन्या सुपूर्विका सुप्रतिष्ठा ५ गायत्री ६ उष्णिक् ७ अनुष्टुप् ८ बृहती ९ पंक्तिः १० ॥ १९ ॥

त्रिष्टुप् च जगती चैव तथाऽतिजगती मता ।

शक्करी सातिपूर्वा स्यादष्ट्यत्यष्टी ततः स्मृते ॥२०॥

त्रिष्टुप् ११ जगती १२ अतिजगती १३ शक्करी १४ सा शक्करी अतिपूर्वा स्यादतिशक्करी १५ अष्टिः १६ अत्यष्टिः १७ ॥ २० ॥

धृतिश्चातिधृतिश्चैव कृतिः प्रकृतिराकृतिः ।
विकृतिः संकृतिश्चापि तथाभिकृतिरुत्कृतिः ॥२१॥

धृतिः १८ अतिधृतिः १९ कृतिः २० प्रकृतिः २१ आकृतिः २२ विकृतिः २३ संकृतिः २४ अभिकृतिः २५ उत्कृतिः २६ ॥ २१ ॥

इत्युक्ताश्छंदसां संज्ञाः क्रमशो वच्मि सांप्रतम् ।
लक्षणं सर्ववृत्तानां मात्रावृत्तानुपूर्वकम् ॥ २२ ॥

इति भट्टकेदारविरचिते वृत्तरत्नाकरे प्रथमोऽध्यायः१

इति छंदसां संज्ञा जाताख्याः क्रमशः क्रमेण उक्ताः । सांप्रतं सर्ववृत्तानां लक्षणं चिह्नं वच्मि भणामि । मात्रावृत्तान्यार्यादीनि अनुपूर्वं यस्मिन्लक्षणे तन्मात्रावृत्तानुपूर्वकं लक्षणं भणामीति संबंधः ॥ २२ ॥ इति वृत्तरत्नाकराख्यछंदःशास्त्रस टीकायां प्रथमोऽध्यायः ॥ १ ॥

आर्यालक्षणमाह ।

सांप्रतमार्यालक्षणमाह—

लक्ष्मैतत्सप्त गणा गोपेता भवति नेह विषमे जः ।
षष्ठोऽयं न लघुर्वा प्रथमेऽर्धे नियतमार्यायाः॥ १ ॥

आर्यायाः प्रथमेऽर्धे एतल्लक्ष्म लक्षणं नियतं निश्चितं वर्तते । एतत्किं सप्त गणाः गोपेताः इहास्यामार्यायां विषमे स्थाने प्रथमतृतीयपं चमसप्तमरूपे जगणो न भवति षष्ठश्चायं जगणो

भवति अथवा न लघुर्भवति इत्यार्याप्रथमदले निश्चितं लक्षणं भवति । शिष्येण पृष्टं आर्यायां कचित् पदनियमोऽस्ति । गुरुराह ॥ १ ॥

षष्ठे द्वितीयलात्परकेंऽतेमुखलाच्च स यतिपदनियमः।
चरमेऽर्धे पंचमके तस्मादिह भवति षष्ठो लः ॥२॥

षष्ठे द्वितीयेत्यादिव्याख्या ॥ षष्ठेंऽते षष्ठस्थानवर्तिनि नलघुरूपे द्वितीयलाद्द्वितीयलघोः प्रारभ्य नियमो भवति षष्ठे नगणलघौ सति प्रथमलघुस्थाने यतिरित्यर्थः । तथा परके पुरोवर्तिनि सप्तमकेंऽते नलघौ सति मुखलात्परः पदनियमो भवति षष्ठगणांते यतिरित्यर्थः । पंचमीत्वात्पूर्वसंग्रहः । अत्र पंचमी अर्वाक्सूचका दृश्यते । यथा पाटलिपुत्राद्दृष्टो देव इत्यत्र पाटलिपुत्रपुरादर्वाक् इति गम्यते । चरमेर्धे द्वितीयदले पंचमकेंऽते सति पंचमगणस्थानवर्तिनि नलघौ सति तस्मान्मुखलघुतः परतः पदनियमो भवति । चतुर्थगणांते यतिरित्यर्थः । इह द्वितीयेऽर्धे षष्ठो लो लघुर्भवति ॥ २ ॥

त्रिष्वंशकेषु पादो दलयोराद्येषु दृश्यते यस्याः ।
पथ्येति नाम तस्याश्छंदोविद्भिः समाख्यातम् ॥३॥

यस्या आर्याया द्वयोराद्येषु त्रिष्वंशेषु गणेषु द्वादशमात्रासु पादो दृश्यते शेषं प्रकटम् ॥ ३ ॥

संलंघ्य गणत्रयमादिमंशकलयोर्द्वयोर्भवति पादः।
यस्यास्तां पिंगलनागो विपुलामिति समाख्याति४

यस्या आर्याया द्वयोः शकलयोरादिमं गणत्रयं संलंघ्यातिक्रम्य पादो भवति तां पिंगलश्चासौ नागश्च पिंगलनागः पिंगलाचार्यस्य शेषरूपत्वात् विपुलार्यामिति समाख्याति ॥४॥

उभयार्धयोर्जकारौ द्वितीयतुर्यौ गमध्यगौ यस्याः ।
चपलेति नाम तस्याः प्रकीर्तितं नागराजेन ॥५॥

यस्या आर्याया उभयार्धयोर्द्वितीयतुर्यौ जकारौ स्यातां जकारौ किंभूतौ गुरुमध्यगतौ तस्याः चपलेति नाम नागराजेन प्रकीर्तितं कथितम् ॥ ५ ॥

आद्यं दलं समस्तं भजेत लक्ष्म चपलागतं यस्याः ।
शेषे पूर्वजलक्ष्मा मुखचपला सोदिता मुनिना ॥६॥

यस्या आर्याया आद्यं दलं प्रथमं चपलागतं चपलाश्रितं लक्ष्म लक्षणं समस्तं भजेत आश्रयेत शेषे पश्चिमेऽर्धे पूर्वजं लक्ष्म यस्याः सा पूर्वजलक्ष्मा मुखे आदौ चपला मुखचपला सा उदिता कथिता मुनिना पिंगलेन ॥ ६ ॥

प्राक्प्रतिपादितमर्धे प्रथमेतरे तु चपलायाः ।
लक्ष्माश्रयेत सोक्ता विशुद्धधीभिर्जघनचपला ॥७॥

इत्यार्याप्रकरणम् ॥

प्रथमेऽर्धे प्राक् पूर्वं प्रतिपादितं कथितं सप्त गणा गोपेता भवति नेह विषमे ज इत्यादिलक्षणमाश्रयेत । पुनः प्रथमेतरे तु चरमेऽर्धे चपलायाः लक्ष्म लक्षणमाश्रयेत । सा विशुद्धधीभिर्जघने पुरोभागे चपला इव जघनचपलोक्ता ॥ ७ ॥ इति पंचार्याभेदाः ॥ इति आर्याप्रकरणम् ॥

अधुना गीतिलक्षणमाह—

आर्याप्रथमदलोक्तं
यदि कथमपि लक्षणं भवेदुभयोः ।

दलयोः कृतयतिशोभां
तां गीतिं गीतवान् भुजंगेशः ॥ १ ॥

यदि कथमप्यार्यायाः प्रथमदलोक्तं लक्षणमुभयोरपि दलयोर्भवेत् तां गीतिं भुजंगेशः पिंगलः गीतवान् । गीतिं किंविशिष्टाम् । कृता यतिभिर्विच्छेदैः शोभा यस्याः सा तथा ताम् ॥१॥

आर्याद्वितीयकेऽर्धे यद्गदितं लक्षणं तत्स्यात् ।
यद्युभयोरपि दलयोरुपगीतिं तां मुनिर्ब्रूते ॥ २ ॥

यदार्याद्वितीयकेऽर्धे लक्षणं गदितं कथितं वर्तते तल्लक्षणं यदि उभयोरपि दलयोः स्यात्तदा तामुपगीतिं मुनिः पिंगलो ब्रूते भणति ॥ २ ॥

आर्याशकलद्वितयं व्यत्ययरचितं भवेद्यस्याः ।
सोद्गीतिः किल कथिता तद्वद्यत्यंशभेदसंयुक्ता ॥३॥

यस्या आर्यायाः शकलद्वितयं खंडद्वयं व्यसयरचितं प्रथमे स्थाने द्वितीयं द्वितीयस्य स्थाने प्रथमं लक्षणं भवेत् । प्रथमे दले मात्रा२७ द्वितीये दले मात्रा ३० सा उद्गीतिः । किलशब्दो निश्चये एतर्ह्येवं किल श्रूयते । कथिता तद्वत् तेनैव प्रकारेण यतयश्च अंशाश्च यत्यंशाः तेषां भेदस्तेन संयुक्ता ॥ ३ ॥

आर्यापूर्वार्धं यदि
गुरुणैकेनाधिकेन निधने युक्तम् ।
इतरत्तद्वन्निखिलंदलं
यदीयमुदितैवमार्यागीतिः ॥ ४ ॥

इति गीतिप्रकरणम् ॥

यदि आर्यापूर्वार्धमेकेनाधिकेन गुरुणा निधने अवसाने

युक्तं भवति तदीयमितरद्द्वितीयं दलं निखिलं समस्तं तद्वृत्तस्यैव पूर्वदलवद्भवति तदा एवमार्यागीतिरुक्ता उदिता । समस्तपादेषु कला द्वात्रिंशत् ३२ भवंति ॥ ४ ॥ इति चतस्रो गीतयः ॥ इति गीतिप्रकरणम् ॥

षड्विषमेऽष्टौ समे कला
स्ताश्चसमेस्युर्नो निरंतराः ।
न समात्रपराश्रिताः कला
वैतालीयेंऽते रलौ गुरुः ॥ १ ॥

अत्र वैतालीये छंदसि विषमे पादे प्रथमतृतीयरूपे षट् कला मात्रा भवंति । समे पादे द्वितीयचतुर्थरूपेऽष्टौ कला भवंति । च पुनस्ताः कलाः समे पादे निरंतरा अंतररहिता लघवो न स्युः । अत्र वैतालीये समकला द्वितीया चतुर्थी षष्ठी च पराश्रिता न भवति । कोर्थः । द्वितीया लघुरूपा कला तृतीयकलायां न मिलति । चतुर्थी पंचम्यां षष्ठी सप्तम्यां चेत्थं न स्यात् । पूर्वाश्रिताः स्युर्द्वितीया प्रथमायां चतुर्थी तृतीयायामेवं स्यात् । अंते षट् कलाग्रतोऽष्टकलाग्रतश्च रलौ रगणलघू कार्यौ । ततो गुरुरेक इति चतुष्पादेषु ॥ १ ॥

पर्यंते र्यौ तथैव शेषं त्वौपच्छंदसिकं सुधीभिरुक्तम् २

पर्यंते अंते र्यौ रगणयगणौ भवतः । शेषं तथैव षट्कला विषमेऽष्टौ समे तदौपच्छंदसिकं सुधीभिः पंडितैरुक्तं भणितम् ॥

आपातलिका कथितेयं भाद्गुरुकावथ पूर्ववदन्यत् ३

भाद्भगणाद्गुरुकौ द्वौ यदि भवतस्तदा आपातलिकानाम छंदो भवति । अथानंतरमन्यत्पूर्ववत् ॥ ३ ॥

तृतीययुग्दक्षिणांतिका समस्तपादेषु द्वितीयलः ४

समस्तपादेषु द्वितीयो लघुस्तृतीयेन सह युक् संमिलितो भवेत् । तदा दक्षिणांतिकानाम छंदो भवति ॥ ४ ॥

उदीच्यवृत्तिर्द्वितीयलः सक्तोऽग्रेण भवेदयुग्मयोः ५

यत्र अयुग्मयोर्विषमपादयोर्द्वितीयो लघुरग्रेण तृतीयेन लघुना सह सक्तः संबद्धो मिलितो भवति । सा उदीच्यवृत्तिरुदिता कथिता ॥ ५ ॥

पूर्वेण युतोऽथ पंचमः प्राच्यवृत्तिरुदितेति युग्मयोः ६

अथ यत्र युग्मयोः समपादयोः पंचमो लघुः पूर्वेण युतश्चतुर्थेन संयुक्तो भवति । सा प्राच्यवृत्तिरुदिता ॥ ६ ॥

यदा समावोजयुग्मकौ पूर्वयोर्भवति तत्प्रवृत्तकम् ७

ओजयुग्मकौ विषमसमौ यदा पूर्वयोरुदीच्यवृत्तिप्राच्यवृत्त्योः समौ तुल्यौ यथासंख्येन विषमसमौ यदा वा भवतस्तदा प्रवृत्तकंनाम छंदो भवति ॥ ७ ॥

अस्य युग्मरचितापरांतिका ॥ ८ ॥

अस्य वैतालीयस्य युग्मरचिता समपादरचिता समस्तपादेष्वष्टौ कला रगणो लघुर्गुरुश्च भवति साऽपरांतिकानाम छंदः ॥ ८ ॥

अयुग्मगा चारुहासिनी ॥ ९ ॥

इति वैतालीयप्रकरणम् ॥

वैतालीयादेर्विषमपादजाता समस्तपादेषु सैव लक्षणेन चारुहासिनी भवति ॥ ९ ॥ इति वैतालीयप्रकरणम् ॥

वक्त्रं नाद्यान्नसौ स्यातामब्धेर्योऽनुष्टुभि ख्यातम् १

आद्यात्प्रथमाक्षरात्परतो नसौ नगणसगणा नै स्यातां न भवेताम् । किंतु नियमेनाब्धेः परो यो यगणः कार्यस्तदा

वक्रंनाम छंदः स्यात् । अनुष्टुभि अनुष्टुप्प्रकरणे ख्यातं प्रसिद्धम् ॥ १ ॥

युजोर्जेन सरिद्भर्तुः पथ्यावक्रं प्रकीर्तितम् ॥ २ ॥

युजोः समपादयोः सरिद्भर्तुः समुद्राच्चतुरक्षरात् जेन जगणेन कृत्वा पथ्यावक्रंनाम छंदः प्रकीर्तितं कथितम् ॥ २ ॥

अयुजोर्जेन वारिधेस्तदेव विपरीतादि ॥ ३ ॥

अयुजोर्विषपादयोर्वारिधेश्चतुरक्षरात्परे पादे जेन जगणेन तदेव पथ्यावक्रंनाम विपरीतादि विपरीतपथ्यावक्रं भवतीत्यर्थः ॥ ३ ॥

चपलावक्रमयुजोर्नकारश्चेत्पयोराशेः ॥ ४ ॥

अयुजोः विषमपादयोः पयोराशेः समुद्राच्चतुरक्षराच्चेद्यदि नकारो नगणो भवति । तदा चपलावक्रंनाम छंदः स्यात् ॥४॥

यस्यां लः सप्तमो युग्मे सा युग्मविपुला मता ॥५॥

यस्यां छंदोजातौ सप्तमस्थाने युग्मे समपादे सप्तमो लो लघुर्भवति । सा युग्मविपुला मताभिप्रेता ॥ ५ ॥

सैव तस्याखिलेष्वपि ॥ ६ ॥

सैव तस्याचार्यस्याभिप्रायेण यस्याः सकलेषु समस्तेषु सप्तमो लघुर्भवति । सा युग्मविपुला भवति ॥ ६ ॥

भेनाब्धितो भाद्विपुला ॥ ७ ॥

अब्धितः समुद्राद्भेन भगणेन भाद्भकारात्परा

त्यर्थः ॥ ७ ॥

इत्थमन्या रश्चतर्थात ॥ ८ ॥

इत्थममुना प्रकारेण चतुर्थाच्चतुरक्षरात् रो रगणो यदि भवति । तदान्या रविपुला भवति ॥ ८ ॥

नोऽम्बुधेश्चेन्नविपुला ॥ ९ ॥

अंबुधेः समुद्राच्चतुरक्षरात्परो यदि नो नगणस्तदा नविपुला भवति ॥ ९ ॥

तोऽब्धेस्तत्पूर्वान्या भवेत् ॥ १० ॥

इति वक्त्रप्रकरणम् ॥

अब्धेश्चतुरक्षराद्यदि तस्तदा अन्या विपुला तत्पूर्वा तविपुला भवति ॥ १० ॥ इति वक्त्रप्रकरणम् ॥

द्विकगुणितवसुलघुरचलधृतिरिति ॥ १ ॥

अथात्र वृत्तान्यधिक्रियंते । तान्येवाह ॥ द्वावेव द्विकौ द्वाभ्यां गुणिता वसवोऽष्टौ लघवो यस्यां सा द्विकगुणितवसुलघुः अचलधृतिर्नाम छंदो भवति । तथा आपदाकुलकं छंदो यावद्द्विकगुणितवसुलघुरिति वर्तते । तेनोत्तरत्र षोडश मात्रा अधिक्रियंते ॥ १ ॥

मात्रासमकं नवमल्गंतम् ॥ २ ॥

उपचित्रा नवमे परयुक्ते ॥ ३ ॥

अष्टाभ्यो भाद्गावुपचित्रा ॥ ४ ॥

जोन्लावथाऽम्बुधेर्विश्लोकः ॥ ५ ॥

मात्रासमकं छंदः स्याद्यत्र नवमो ल् लघुः । ग् गुरुः अंते यस्य तत् षोडश मात्राः । अष्टाभ्यो मात्राभ्यः पुरयुक्ते दशमयुक्ते नवमे मात्राषोडशके उपचित्रा भवति । अष्टाभ्यो भगणस्तस्माद्गौ गुरू यदीयौ भवतस्तदा उपचित्रा स्यात् । अंबुधेश्चतसृभ्यो मात्राभ्यः परो जगणो यदि भवति न्लौ वा नगणलघू वा

भवतस्तदा विश्लोकोनाम छंदो भवति ॥ २ ॥ ३ ॥ ४ ॥५॥

तद्युगलाद्वानवासिका स्यात् ॥ ६ ॥

तद्युगलादम्बुधियुग्मात् अष्टाभ्यो मात्राभ्यः परो जो यदि वा न्लौ । तदा वानवासिकानाम छन्दो भवति ॥ ६ ॥

बाणाष्टनवसु यदि लश्चित्रा ॥ ७ ॥ यदतीतकृतविविधलक्ष्मयुतैर्मात्रासमादिपादैः कलितम् । अनियतवृत्तपरिमाणसहितं प्रथितं जगत्सु पादाकुलकम् ॥ ८ ॥

बाणाष्टनवसु पंचमाष्टमनवममात्रासु यदि लो लघुस्तदा चित्रानाम छंदः ॥ ७ ॥ यदिति ॥ अतीतं पूर्वं कृतं विविधं नानारूपं लक्ष्म लक्षणं तेन युतैः प्रागुक्तमात्रासमादिलक्षणसहितैः पादैर्यच्छंदः कलितमनियतमनिश्चितं यद्वृत्तपरिमाणं तेन सहितमेवंविधं जगत्प्रसिद्धं यत्तत्पादाकुलकंनाम छंदः ॥

वृत्तस्य लो विना वर्णैर्गा वर्णा गुरुभिस्तथा ।
गुरवो लैर्दले नित्यं प्रमाणमिति निश्चितम् ॥९॥

वृत्तस्येति ॥ यस्य कस्यापि वृत्तस्य लो लघवो मात्रारूपा भवंति तेभ्यो वर्णैरक्षरैर्विना गा गुरुसंख्या भवति । तथा तेभ्यो लघुभ्यो गुरुभिस्तत्संख्यां विना वर्णसंख्या भवति । तेभ्यो मात्राभ्यः तैर्लघुभिर्विना शेषमात्राणां च दले कृते सति तत्संख्याका गुरवो वाच्याः । यथात्रैव वृत्ते एवं सर्वत्र ज्ञेयम् ॥ ९ ॥

शिखिगुणितदशलघुरचित
मपगतलघुयुगलमपरमिदमखिलम् ।
गुरुकशकलयुगलमपि सुपरि
घटितललितपदनिचिति भवति शिखा ॥१०॥

शिखीति ॥ शिखी अग्निः ३ शिखिभिस्त्रिभिर्गुणिता ये दश लघवस्तै रचितं यत्तत् । पुनः कीदृशं अपगतं लघुयुगलं यस्मात्तत् । एवं प्रथमं दलं तथा परं द्वितीयं दलमखिलं संपूर्णं त्रिशन्मात्रकं तथा दलद्वयमपि सगुरुकम् । कोऽर्थः । प्रथमे दलेऽष्टाविंशतिलघवः प्रांते गुरुश्च द्वितीये त्रिंशन्मात्राः प्रांते गुरुः एवं दलद्वये द्विषष्टि लघव इत्यर्थः । कथंभूतं सुपरि शोभनप्रकारेण घटितानि बद्धानि ललितानि मनोज्ञानि पदानि तेषां निचिती रचना यस्मिंस्तच्छिखानाम छंदो भवति ॥

विनिमयविहितसकलयुगललघु-
ललितपदविततिरचितगणनिचया ।
श्रुतिसुखकृदियमपि जगति जशिर
उपगतवति जि सति भवति स्रजा ॥ ११ ॥

विनिमयेन वैपरीत्येन विहितं यत्सकलयुगलं तस्य लघवस्तैर्ललिता या पदविततिः पदश्रेणिस्तया रचिता निबद्धा गणसमूहा यस्यां सा । श्रुत्योः सुखं करोतीति श्रुतिसुखकृत् क सति जि जकारे जकारस्य शिरसि उपगतवतीत्यर्थः । स्रजानाम छंदः ॥ ११ ॥

अष्टावर्धे गा द्व्यभ्यस्ता
यस्याः सानंगक्रीडोक्ता ।
दलमपरमपि वसुगुणितसलिलनि-
धिलघुकविरचितपदवितति भवति ॥ १२ ॥

यस्या अर्धे दले अष्टौ गा गुरवो भवंति । कथंभूता गुरवः द्व्यभ्यस्ता द्विगुणिताः षोडश गुरव एव स्युरित्यर्थः । तथापरं द्वितीयमपि दलं वसुभिरष्टाभिर्गुणिता ये सलिलनिधयश्चत्वारो

लघवो यस्मिंस्तत्कविभी रचिता पदवितति: पदश्रेणिर्यस्य तत् । सा अनंगक्रीडानाम छंदो भवति ॥ १२ ॥

त्रिगुणनवलघुरवसितिगुरुरिति दलयुगकृततनुरिह रुचिरा ॥ १३ ॥ इति मात्राप्रकरणम् । इति भट्ट-केदाररचिते वृत्तरत्नाकरे द्वितीयोऽध्यायः ॥ २ ॥

त्रिगुणास्त्रिभिर्गुणिता नव लघवो यस्यां सा त्रिगुणनवलघुः अवसितौ अवसाने गुरुर्यस्याः सा अवसितिगुरुः इत्येवं दलयुगेन खंडयुग्मेन कृता तनुर्यस्याः सा दलयुगकृततनुः रुचिरानामेति छंदः ॥ १३ ॥ इति वृत्तरत्नाकराख्ये छंदसि मात्राप्रकरणवृत्तौ द्वितीयोऽध्यायः ॥ २ ॥

उक्ता ग् श्रीः ॥१॥ अत्युक्ता गौ स्त्री: ॥ २ ॥ मध्या मो नारी रो मृगी ॥ ३ ॥ प्रतिष्ठा म्गौ चेत्कन्या ॥ ४ ॥

इदानीं समवृत्ताध्यायमभिधातुमाह ॥ गु गुरुर्यदि पादे-पादे एकैको वर्णो भवति । तदा उक्तायां जातौ श्रीनाम वृत्तं भवति ॥ १ ॥ पादेपादे द्वौ गकारौ यदि भवतस्तदा अत्युक्तायां जातौ स्त्रीनाम छंदो भवति ॥ २ ॥ पादेपादे एकैको मगणो यदि भवति तदा मध्यायां जातौ नारीनाम छंदः । रो रगणो यदि भवति तदा मध्यायां जातौ मृगीनाम छंदः ॥ ३ ॥ एवं यावंतश्छंदोभेदा भवंति तावंत एवमवतार्याः । म्गौ मगणगुरू चेद्यदि भवतस्तदा प्रतिष्ठायां जातौ कन्यानाम छंदः ॥ ४ ॥

सुप्रतिष्ठा भ्गौ गिति पंक्तिः ॥ ५ ॥ गायत्री त्यौ स्त-स्तनुमध्या । शशिवदना न्यौ । त्सौ चेद्वसुमती ॥ ६ ॥

भ्गौ भगणगगणौ द्वौ गुरू च भवत इति सुप्रतिष्ठायां जातौ

पंक्तिर्नाम छंदः ॥ ६ ॥ त्यौ तगणयगणौ यदि स्तस्तदा गायत्र्यां जातौ तनुमध्या। न्यौ नगणयगणौ यदि तदा शशिवदना। चेद्यदि त्सौ तगणसगणौ भवतस्तदा वसुमती ॥

उष्णिक् मधु यदि ननगाः। कुमारललिता
ज्सौ ग्। म्सौ गः स्यान्मदलेखा ॥ ७ ॥

यदि ननगाः द्वौ नगणौ गुरुश्च यदा भवति तदा उष्णिहि जातौ मधुसंज्ञं भवति । ज्सौग् जगणसगणौ गुरुश्च कुमारललिता। म्सौ गः मगणसगणौ गुरुश्च यदा भवति तदा मदलेखा ॥ ७ ॥

अनुष्टुप्। भौ गिति चित्रपदा गः। मो मो
गो गो विद्युन्माला। माणवकं भात्तलगाः।
म्नौ गौ हंसरुतमेतत्। जौ समानिका गलौ
च। प्रमाणिका जरौ लगौ । वितानमाभ्यां
यदन्यत् ॥ ८ ॥

अथानुष्टुब्जातौ भौ ग्गः द्वौ भगणौ गुरुद्वयं च यदा भवति तदा चित्रपदानाम। मो मो गो गो द्वौ मगणौ द्वौ गुरू च विद्युन्माला छंदः। भाद्भगणात् परे तलगाः तगणलघुगुरवो यदि भवंति तदा माणवकं छंदः। मगणनगणौ द्वौ गुरू चैतत् हंसरुतंनाम छंदः। रगणजगणौ गुरुलघू च यदि भवतस्तदा समानिकानाम छंदः। जगणरगणौ लघुगुरू च तदा प्रमाणिकानाम छंदः। आभ्यां समानिकाप्रमाणिकाभ्यां यदन्यल्लक्षणं तद्वितानंनाम छंदो भवति ॥ ८ ॥

बृहती। रान्नसाविह हलमुखी।
भुजगशिशुभृता नौ मः ॥ ९ ॥

अथ बृहत्यां जातौ रात् रगणात्परौ नसौ नगणसगणौ यदि भवतस्तदा हलमुखीनाम छंदः। इहास्मिन् शास्त्रे द्वौ नगणौ मगणश्च यदि भवति तदा भुजगशिशुभृतानाम छंदो भवति ॥ ९ ॥

पंक्तिः। म्सौ ज्गौ शुद्धविराडिदं मतम्। म्नौ गौचेति पणवनामेदम्। जौ रगौ मयूरसारिणी स्यात्। भ्मौ सगयुक्तौ रुक्मवतीयम्। ज्ञेया मत्ता मभसगयुक्ता। चंपकमाला चेद्भमसाद्गः। नरजगैर्भवेन्मनोरमा ॥ १० ॥

पंक्त्यां जातौ म्सौ मगणसगणौ ज्गौ जगणगुरू च यदि भवतस्तदा शुद्धविराडिति मतमभिप्रेतं। मगणनगणौ रगणगुरू च यदा भवतस्तदा पणवनामकं छंदः। रगणजगणौ रगणगुरू च यदि भवतस्तदा मयूरसारिणीनाम छंदः स्यात्। भगणमगणौ सगणगुरुभ्यां युक्तौ यदि भवतस्तदा रुक्मवतीयं भवति। मभसगाः मगणभगणसगणगुरवस्तैर्युक्ता यदा भवति तदा मत्ता ज्ञेया। भगणमगणसगणाच्चेद्यदि गुरुर्भवति तदा चंपकमालानाम छंदः। नगणजगणरगणगुरुभिर्युक्ता यदि भवेत्तदा मनोरमा भवति ॥ १० ॥

त्रिष्टुप्। त्जौ ज्गौ गुरुणेयमुपास्थितोक्ता। स्यादिंद्रवज्रा यदि तौ जगौ गः। उपेंद्रवज्रा जतजास्ततो गः। अनंतरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ताः। इत्थं किलान्यास्वपि मिश्रितासु स्मरंति जा-

तिष्विदमेव नाम ॥ सांद्रपदं भ्तौ नगलघु-
भिश्च । नजजलगैर्गदिता सुमुखी । दोध-
कवृत्तमिदं भभभाद्गौ । शालिन्युक्ता म्तौ
तगौ गोऽब्धिलोकैः । वातोर्मीयं गदिता
म्तौ तगौ गः । पंचरसैः श्रीर्भतनगगैः स्या-
त् । म्भौ न्लौ गः स्याद्भ्रमरविलसिता । रान्न-
राविह रथोद्धता लगौ स्वागतेति रनभाद्गु-
रुयुग्मं ॥ ननसगगुरुरचिता वृत्ता । ननरलगु-
रुभिश्च भद्रिका । श्येनिका रजौ रलौ गुरुर्य-
दा । उपस्थितमिदं ज्सौ ताद्गकारौ ॥ ११ ॥

त्रिष्टुभि जातौ तगणजगणौ जगणगुरू च गुरुणा कृत्वा यदि तदेयमुपस्थिता उक्ता कथिता । द्वौ तगणौ जगणगुरू गुरुश्च यदि भवति तदा इंद्रवज्रानाम छंदः स्यात् । जतजा जगणतगणजगणास्ततोऽग्रतो गुरू द्वौ च यदि भवतस्तदा उ-पेंद्रवज्रा भवति । अनंतरशब्दे पाश्चात्त्यवृत्तद्वयमिंद्रवज्रोपेंद्रवज्रा-ख्यं गृह्यते । अनंतरमुदीरितमनंतरोदीरितं तच्च लक्ष्म तद्भजतः अनंतरोदीरितलक्ष्मभाजौ यौ यदीयौ पादौ । यस्या इमौ यदीयौ तावुपजातय उच्यंते । इत्थमनेन प्रकारेण अन्या-स्वपि जातिषु मिलितासु पूर्वाचार्या इदमेव नाम स्मरं-ति । यथा कुमारसंभवे प्रथमसर्गे उपजातिश्छंदः । अस्त्युत्त-रस्यां दिशि देवतात्मा । अत्र प्रथमपादे इंद्रवज्रा । हिमालयो नाम नगाधिराज इत्यत्रोपेंद्रवज्रा । एवं तृतीयचतुर्थचरणयो-रप्यवगंतव्यम् । भ्तौ भगणतगणौ नगलघुभिः नगणगुरुलघु-

भिश्च सांद्रपदं नाम छंदः । नजजलगैः नगणजगणजगणल-घुगुरुभिस्तदा सुमुखी गदिता कथिता । भभभाद्गणाद्गौ गुरू यदि भवतस्तदा इदं दोधकं वृत्तं स्यात् । मततगणादग्रे द्वौ गुरू भवतोऽत्राब्धिलोकैश्चतुःसप्तभिरक्षरैर्यतिर्विधेया तदा शा-लिनी उक्ता । अत्र छंदसि चतुर्वर्णेभ्यः एका यतिः कार्या । ततः सप्तवर्णेभ्यो द्वितीया यतिर्विधेया । परमत्र यदि यतिर्न स्यात्तदा छंदोऽप्यलीकः । मगणतगणौ तगणगुरू गुरुश्च इयं वातोर्मी । पंचरसैः पंचभिः षड्भिश्च यदि यतिर्भवति भतनग-गः भगणतगणनगणैर्गुरुभ्यां तदा श्रीर्नाम छंदः स्यात् । मगणभगणौ नगणलघुगुरवश्च भवंति तदा भ्रमरविलसिता स्यात् । इह छंदोजातौ सत् रगणान्नरौ नगणरगणौ लघुगुरू च भवतस्तदा रथोद्धतानाम । रनभात् रगणनगणभगणाद्यदि गुरुयुग्मं भवति तदा स्वागता भवति । नगणभगणसगणगुरुगु-रुभी रचिता वृत्तानाम छंदः । नगणनगणरगणलघुगुरुभिर्भ-द्रिकानाम छंदः । रगणजगणौ रगणलघुगुरवश्च यदा तदा श्येनिकानाम छंदः । जगणसगणौ ततः तगणात्परौ गुरू च भवतस्तदा उपस्थितमिदं छंदः ॥ ११ ॥

जगती । चंद्रवर्त्म गदितं तु रनभसैः । जतौ तु वंशस्थमुदीरितं जरौ । स्यादिंद्रवंशा त-तजै रसंयुतैः । इह तोटकमंबुधिसैः प्रथि-तम् । द्रुतविलंबितमाह नभौ भरौ । वसुयु-गविरतिर्नौ म्यौ पुटोऽयम् । प्रमुदितवदना भवेन्नौ ररौ । नयसहितौ न्यौ कुसुमविचि-त्रा । रसैर्जसजसा जलोद्धतगतिः । भत्तं-

गप्रयातं भवेद्यैश्चतुर्भिः । रैश्चतुर्भिर्युता स्र-
ग्विणी संमता । भुवि भवेन्नभजरैः प्रियं-
वदा । त्यौ त्यौ मणिमाला छिन्ना गुहवक्त्रैः।
धीरैरभाणि ललिता तभौ जरौ ।जजाविह
मौक्तिकदाम जजौ च । त्यौ त्याविति नि-
र्दिष्टा पुष्पविचित्रा । विभावरी तु सा जरौ
जरौ यतः । प्रमिताक्षरा सजसजैरुदिता ।
ननभरसहिताभिहितोज्ज्वला । पंचाश्वैश्छि-
न्ना वैश्वदेवी ममौ यौ । अब्ध्यंगैः स्याज्ज-
लधरमाला म्भौ स्मौ । इह नवमालिनी न-
जपरौ भ्यौ । स्वरशरविरतिर्ननौ रौ प्रभा ।
भवति न जावथ मालती जरौ इति वद
तामरसं नजजाद्यः ॥ १२ ॥

जगत्यां जातौ रश्च नश्च भश्च सश्च रनभसाः रगणनगण-
भगणसगणास्तैश्चंद्रवर्त्म गदितं कथितम् । जश्च तश्च जतौ जग-
णतगणौ तु पुनः जरौ जगणरगणौ यदि भवतस्तदा वंशस्थं
नाम छंदः उदीरितं कथितम् । तगणतगणजगणैः रगणसंयु-
क्तैः इंद्रवंशा स्यात् । इह छंदोजातौ अंबुधिसैश्चतुःसगणैः तो-
टकं प्रथितम् । नश्च भश्च नभौ नगणभगणौ भरौ भगणरगणौ
च भवतस्तदा द्रुतविलंबितमाह । नौ नगणनगणौ म्यौ मगण-
यगणौ च यत्र वसवोऽष्टौ युगानि चत्वारि तैर्यतिर्यस्मात्सो-
ऽयं पुटोनाम छंदः । नौ नगणनगणौ ररौ रगणरगणौ च
यत्र भवतः सा प्रमुदितवदना भवेत् । न्यौ नगणयगणौ नग-

णयगणसंयुक्तौ यत्र सा कुसुमविचित्रा। रसैः षड्भिर्यतिः जस-जसा जगणसगणजगणसगणैः रचिता या सा जलोद्धतगति-र्नाम छंदः। चतुर्भिर्यैर्यगणैर्भुजंगप्रयातंनाम छंदो भवेत्। च-तुर्भिः रैः रगणैः स्रग्विणी संमता कथिता। नगणभगणज-गणरगणैर्भुवि पृथिव्यां प्रियंवदानाम छंदो भवेत्। तगणयग-णौ तगणयगणौ च यत्र सा मणिमालानाम। परं गुहवक्त्रैः छिन्ना गुहः कार्तिकेयस्तस्य वक्त्राणि मुखानि षट् तत्संख्यया यतिर्विधेया। तगणभगणौ जगणरगणौ च यत्र सा धीरैर्म-नीषिभिः ललिता अभाणि। चत्वारो जगणा यत्र तत् मौक्ति-कदाम छंदः इह अस्मिन् शास्त्रे स्यात्। तगणयगणौ तगण-यगणौ च इत्यनेन प्रकारेण यत्र सा मुनिना पुष्पविचित्रा निर्दिष्टा कथिता। जगणरगणौ तु पुनः जगणरगणौ यतो भवतः सा विभावरीनाम। सगणजगणसगणजगणैः प्रमिता-क्षरानाम उदिता कथिता। नगणनगणभगणरगणसहिता या सा उज्ज्वला अभिमता। द्वौ मगणौ ततो द्वौ यगणौ यत्र सा वैश्वदेवी परंतु पंचाश्वैश्छिन्ना पंचाक्षरैः प्रथमा यतिः ततोऽ-श्वैः सप्तभिर्द्वितीया यतिः कार्या। अब्धयश्चत्वारोऽगान्यष्टौ तैर्विरामो यत्र मगणभगणौ सगणमगणौ च स्याच्च सा जल-धरमालानाम छंदः। नगणजगणाभ्यां परौ भगणयगणौ यदि स्तस्तदा इह छंदोजातौ नवमालिनी भवति। स्वरैः सप्तभिस्ततः शरैः पंचभिर्विरतिर्विरामो यत्र च द्वौ नगणौ द्वौ रगणौ च भवतः सा प्रभानाम छंदः। नगणजगणौ अथ ज-गणरगणौ यत्र स्तः सा मालतीनाम भवति। नगणजगण-जगणात्परो यगणः स्याच्चदा तामरसंनाम छंदः इति त्वं वद कथय॥ १२॥

अतिजगती। नग्गाग्मयनिर्नौ ततो गः

क्षमा । म्तौ ज्रौ गस्त्रिदशयतिः प्रहर्षिणी-
यम् । चतुर्ग्रहैरिह रुचिरा ज्भौ सरौ गः ।
वेदै रंध्रैर्म्तौ यसगा मत्तमयूरम् । जतौ स-
जौ गो भवति मंजुभाषिणी । ननततगुरु-
भिश्चंद्रिकाश्वतुर्भिः ॥ १२ ॥

अथातिजगती जातिः। तुरगरसयतिः सप्तषड्भिर्विरामः स्या-
द्यत्र द्वौ नगणौ द्वौ तगणौ गुरुरेकश्च सा क्षमानाम छंदः ।
मगणतगणौ जगणरगणौ गुरुश्च त्रिदशयतिः त्रिभिरक्षरैस्ततो
द्वितीयो दशाक्षरैर्विरामः। इयं प्रहर्षिणीनाम छंदः । जगणभग-
णौ सगणरगणौ गुरुश्च एभिः रुचिरानाम छंदः । इह छंदसि
चतुर्भिरक्षरैः प्रथमा यतिः ततो ग्रहैर्नवभिरक्षरैर्द्वितीया यतिः
कार्या । वेदैश्चतुर्भिरक्षरैः रंध्रैर्नवभिर्यतिः मगणतगणौ यगण-
सगणगुरुभिः सह यत्र च तत् मत्तमयूरं छंदः । जतौ जगण-
तगणौ सजौ सगणजगणौ गो गुरुश्च यत्र सा मंजुभाषिणी
भवति । नगणनगणतगणतगणगुरुभिश्चंद्रिकानाम छंदः । पर-
मश्वैः सप्तभिस्ततः ऋतुभिः षड्भिर्यतिः कार्या ॥ १२ ॥

शक्करी । म्तौ न्सौ गावक्षग्रहविरतिरसंबा-
धा । ननरसलघुगैः स्वरैरपराजिता । नन-
भनलगिति प्रहरणकलिता । उक्ता वसंत-
तिलका तभजा जगौ गः सिंहोद्धतेयमु-
दिता मुनिकाश्यपेन ॥ उद्धर्षिणीति ग-
दिता मुनिशैतवेन श्रीपिंगलेन कथिता
मधुमाधवीति ॥ १ ॥ इंदुवदना भजसनैः

सगुरुयुग्मैः । द्विःसप्तच्छिदलोला म्सौ म्भौ
गो चरणे चेत् ॥ १४ ॥

अथ शक्वर्यां चतुर्दशाक्षरायां जातौ मगणतगणौ नगणसगणौ द्वौ गुरू च तदाऽसंबाधानाम छंदः। अत्र अक्षैरिंद्रियैः पंचभिः ग्रहैर्नवभिर्यतिः कार्या नगणनगणरगणसगणलघुगुरुभिरपराजितानाम छंदः । अत्र स्वरैः सप्तभिर्यतिः कार्या । द्वौ नगणौ भगणनगणौ लघुगुरू च इत्यनया रीत्या प्रहरणकलितानाम छंदः । तगणभगणजगणजगणा द्वौ गुरू च एभिर्वसंततिलका उक्ता । मतांतरमाह । इयं वसंततिलका काश्यपेन मुनिना सिंहोद्धता उदिता भणिता । तथा शैतवेन मुनिना इयमुद्धर्षिणी निगदिता । श्रीपिंगलेनाचार्येणेयं मधुमाधवीति कथिता। एवंच रूपाण्यपि मतानि । भगणजगणसगणनगणैर्गुरुयुग्मसहितैरिंदुवदना स्यात् । चेद्यदि चरणे पादे मगणसगणौ मगणभगणौ द्वौ गुरू च तदा अलोलानाम छंदः । अत्र द्विः सप्तच्छित् द्वौ वारौ सप्तभिः सप्तभिः छित् छेदो यतिर्विराम इति ॥ १४ ॥

अतिशक्वरी । द्विहतहयलघुरथ गिति शशिकला । स्रगिति भवति रसनवकयतिरियम् । वसुमुनियतिरिह मणिगुणनिकरः। मा बाणा यस्यां सा कामक्रीडा ज्ञातव्या। ननमयययुतेयं मालिनी भोगिलोकैः । भवति नजौ भजौ रसहितौ प्रभद्रकम् । सजना नयौ शरदशकविरतिरेला म्रौ म्यौ
[illegible] ॥ १५ ॥

अथ पंचदशाक्षरायां शक्वर्यां जातौ द्विहता द्वाभ्यां गुणिता हयाः सप्त जाताश्चतुर्दश प्रागेव तावंतो लघवस्तदनु एको गुरुरित्यमुना प्रकारेण शशिकलानाम छंदो भवति। इयं शशिकला यदि रसनवकयतिः षट्नवभिर्यतिस्तदेत्यनया रीत्या स्रग्नाम भवति। इह अस्यां शशिकलायामष्टसप्तभिर्यतिस्तदेयं मणिगुणनिकरः स्यात्। मा बाणाः पंच मगणाः यस्यां सा कामक्रीडासंज्ञा ज्ञातव्या। द्वौ नगणौ एको मगणो द्वौ यगणौ च एभिर्युता इयं मालिनी अस्यां भोगिलोकैः अष्टभिः सप्तभिश्च यतिर्विधेया। नगणजगणौ भगणजगणौ रगणसंहितौ तदा प्रभद्रकं नाम छंदो भवति। सगणजगणनगणाः नगणयगणौ च भवतो यत्र शरदशकविरतिः शरैः पंचभिस्ततो दशभिर्वर्णैर्यतिर्भवति सा एलासंज्ञा स्यात्। मगणरगणौ मगणयगणौ यगणांतौ यदि भवेतां यतिश्च सप्तभिरष्टभिरक्षरैर्भवेत्तदा चंद्रलेखासंज्ञा स्यात्। इत्यतिशक्करी जातिः॥ १९॥

अष्टिः। भ्रत्रिनगैः स्वरान्नवमृषभगजविलसितम्। नजभजरैः सदा भवति वाणिनी गयुक्तैः। जरौ जरौ जगाविदं वदंति पंचचामरम्॥ १६॥

अथ अष्टिजातिस्तत्र भ्रत्रीति भ्रौ भगणरगणौ त्रिनं नगणत्रितयं ततो गो गुरुरेकः एभिः ऋषभगजविलसितं नाम छंदोऽत्र स्वरात्सप्तभ्यः नवं यतिः। नगणजगणभगणजगणरगणैर्गुरुसहितैः तदा वाणिनीनाम छंदो भवति। जगणरगणौ जगणरगणौ जगणगुरू च एतैरिदं छंदः पंचचामरं नाम छंदोविदः वदंति कथयंति॥ १६॥

अत्यष्टिः । रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी। जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः । दिग्मुनि वंशपत्रपतितं भरनभनलगैः । रसयुगहयैः न्सौ म्रौ स्लौगो यदा हरिणी तदा । मंदाक्रांता जलधिषडगैर्म्भौ नतौ ताद्गुरू चेत् । यदि भवतो नजौ भजजला गुरुर्नर्कुटकम् । मुनिगुहकार्णवैः कृतयतिं वद कोकिलकम् ॥१७॥

अथ अत्यष्टिजातिस्तत्र रसैः षड्भिस्ततो रुद्रैरेकादशभिश्छिन्ना विरतिर्यत्र च यगणमगणनगणसगणभगणलघवो गुरुश्च सा शिखरिणी स्यात् । जगणसगणौ जगणसगणयगणलघवो गुरुश्च यत्र सा पृथ्वीनाम छंदः । अत्र अष्टभिस्ततो नवभिर्यतिः कार्या । भगणरगणनगणभगणनगणलघुगुरुभिर्वंशपत्रपतितंनाम छंदः। अत्र दशभिस्ततः सप्तभिर्यतिः। षड्भिस्ततश्चतुर्भिस्ततः सप्तभिर्यतिर्यदा नगणसगणौ मगणरगणौ सगणलघू गुरुश्च तदा हरिणीनाम छंदः स्यात् । चेद्यदि जलधिभिश्चतुर्भिः षड्भिः अगैः सप्तभिः यतिः मगणभगणौ नगणतगणौ तात् तगणात् गुरू च स्यातां तदा मंदाक्रांतानाम छंदः । यदि नगणजगणौ भवतः भगणजगणजगणलघवो गुरुश्च स्यात्तदा नर्कुटकंनाम छंदः । इदं नर्कुटकं यदि मुनिगुहकार्णवैः मुनिभिः सप्तभिः गुहकैरिति गुहः कार्तिकेयस्तस्य कानि मुखानि षट् तैर्गुहकैः षड्भिः अर्णवैश्चतुर्भिश्च कृता यतिर्यत्र स मुनिगुहकार्णवैः कृतयतिस्तं तदा त्वं कोकिलकंनाम छंदः कथय ॥ १७ ॥

धृतिः । स्याद्भूतर्त्वश्वैः कुसुमितल-
तावेल्लिता म्तौ नयौ यौ ॥ १८ ॥

धृतिर्नाम जातिस्तत्र यत्र भूतर्त्वश्वैः पंचषट्सप्तभिर्यतिः मगणतगणौ नगणयगणौ द्वौ यगणौ च सा कुसुमितलता-वेल्लिता स्यात् ॥ १८ ॥

अतिधृतिः ।
रसर्त्वश्वैर्यम्नौ न्सौ ररगुरुयुता मेघविस्फूर्जिता स्यात् ।
सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम् १९

अथ अतिधृतिर्जातिः यमनसररगणगुरुयुता मेघविस्फूर्जिता स्यात्। रसैः षड्भिः ऋतुभिः षड्भिः अश्वैः सप्तभिः कृतवि-रामा । सूर्याश्वैः द्वादशसप्तभिः कृतविरामं । मसजसततगणा गुरुसहिता यत्र तत् शार्दूलविक्रीडितंनाम छंदः स्यात् ॥१९ ॥

कृतिः । ज्ञेया सप्ताश्वषड्भिर्म-
रभनययुता भ्लौ गः सुवदना ।
त्री रजौ गलौ भवेदिहेदृशेन
लक्षणेन वृत्तनाम ॥ २० ॥

अथ कृतिजातौ मरभनयगणसहिता भगणलघू गुरुश्च यत्र च सप्ताश्वषड्भिः सप्तभिः अश्वैः सप्तभिः षड्भिः यतिः सा सुवदना ज्ञेया । त्रिस्त्रीन् वारान् रगणजगणौ ततो गुरुलघू इह ईदृशेन लक्षणेन वृत्तनाम छंदो भवेत् ॥२० ॥

प्रकृतिः । म्रभ्नैर्यानां त्रयेण त्रिमुनि-
यतियुता स्रग्धरा कीर्तितेयम् ॥ २१ ॥

अथ प्रकृतिजातौ मरभनगणैस्ततो यानां त्रयेण यगणत्र-

येण इयं स्रग्धरा कीर्तिता। किंभूता स्रग्धरा त्रिमुनियतियुता सप्तभिस्ततः सप्तभिस्ततः सप्तभिर्विरामसहिता ॥ २१ ॥

आकृतिः। भ्रौ नरना रनावथ
गुरुर्दिगर्कविरमं हि भद्रकमिदम् ॥ २२ ॥

अथ आकृतिजातौ भगणरगणौ ततो नगणरगणनगणास्ततो रगणनगणौ अथ गुरुः। इदं भद्रकंनाम छंदः। किंभूतं दिगर्कविरमं दशभिर्द्वादशभिश्च विरामो यत्र तत्। अत्र हिः पादपूरणे ॥ २२ ॥

विकृतिः। यदिह नजौ भजौ भ्जभलगा-
स्तदश्वललितं हरार्कयति तत्। मत्ताक्रीडं
मौ भ्नौ नौ न्लौ गिति भवति वसुशरदश-
यतियुतम् ॥ २३ ॥

अथ विकृतिर्जातिः। यदिह शास्त्रे नगणजगणौ भगणजगणभगणजगणभगणलघुगुरवश्च स्युस्तत् अश्वललितं नाम छंदः। किंभूतं तत् हरार्कयति हरैरेकादशभिरर्कैर्द्वादशभिर्यतिर्विरामो यत्र तत्। द्वौ मगणौ भगणनगणौ द्वौ नगणौ नगणलघू गुरुश्च इति लक्षणेन मत्ताक्रीडंनाम। कीदृशं मत्ताक्रीडं वसुशरदशयतियुतमष्टपंचदशाभिर्यतिस्तया सहितम् ॥ २३ ॥

संकृतिः। भूतमुनीनैर्यतिरिह भतनाः स्भौ
भनयाश्च यदि भवति तन्वी ॥ २४ ॥

अथ संकृतिर्जातिः। इह छंदोजातौ भतनाः सभौ भनयाश्च एते गणा यदि भवेयुस्तदा तन्वीनाम छंदो भवति। अत्र पंचसप्तद्वादशभिर्यतिः कार्या ॥ २४ ॥

अभिकृतिः । क्रौंचपदा भ्मौ स्भौ ननना-
गाविषुशरवसुमुनिविरतिरिह भवेत् ॥ २५ ॥

अथ अभिकृतिर्जातिः । इह शास्त्रे चेद्यदि भगणभगणौ सगणभगणौ चत्वारो नगणा एको गुरुश्च इषुभिः शरैः पंचभिः वसुभिरष्टभिर्मुनिभिः सप्तभिश्च विरतिः स्यात्तदा क्रौंचपदानाम छंदो भवेत् ॥ २५ ॥ ॥ ॥

उत्कृतिः । वस्वीशाश्वच्छेदोपेतं
ममतनयुगनरसलगैर्भुजंगविजृंभितम् ।
मो नाः षट् सगगिति यदि नवरस-
रसशरयतियुतमपवाहाख्यम् ॥ २६ ॥

अथ उत्कृतिजातौ ममतगणास्ततो नयुगं नगणयुगलं ततो नरसगणलघुगुरवः एतैर्भुजंगविजृंभितंनाम छंदो भवति । कीदृशं तत् वस्वीशाश्वच्छेदोपेतमष्टैकादशसप्तभिश्छेदो विरामस्तेनोपेतं युक्तम् । एको मगणस्ततो नगणाः षट् ततः सगणस्ततो गुरुद्वयमित्यमुना प्रकारेण यदि नवषट्पंचभिर्यतिस्तया युतमुपेतं तदा अपवाहाख्यंनाम छंदः स्यात् ॥२६॥

॥ इति समवृत्तप्रकरणम् ॥

यदिह नयुगलं ततः सप्त रेफास्तदा
चंडवृष्टिप्रयातो भवेद्दंडकः ॥ १ ॥

अथ चंडवृष्ट्यादिकदंडकानाह । यदिहेति । यदि इह दंडकजातौ आदौ नयुगलं नगणयुग्मं ततः सप्त रेफाः सप्त रगणास्तदा चंडवृष्टिप्रयातोनाम दंडको भवेत् । चत्वारोपि पादा ईदृशेन लक्षणेन कर्तव्याः ॥ १ ॥

प्रतिचरणविवृद्धरेफाः स्युरर्णार्णव-
व्यालजीमूतलीलाकरोद्दामशंखादयः ॥ २ ॥

तथात्र प्रतिचरणविवृद्धरेफा इति । दंडकं दंडकं प्रति पादे पादे एकैकरगणवृद्धिः क्रियते तदा अमूनि नामानि दंडकानां पृथक् स्युः । आदौ सर्वत्र नगणद्वयमेव कार्यं तथा च द्वौ नगणौ ततः सप्त रगणाः अत्र तु द्वौ नगणौ ततः पादे पादे अष्टौ रगणास्तदा अर्णनाम दंडकं स्यात् । एवं प्रतिदंडकवृद्धौ नवभिरर्णवनाम । दशभिः रगणैर्व्यालः । एकादशभी रगणैर्जीमूतनाम । द्वादशभी रगणैर्लीलाकरः । त्रयोदशभी रगणैरुद्दामः । तथा पादे पादे आदौ द्वौ नगणौ ततश्चतुर्दश रगणास्तदा शंखोनाम दंडको भवति आदिशब्दात्ययगगनसमुद्रादयोऽपि शिष्टकृतनामानो गृह्यंते रगणवृद्धिरपि कर्तव्या ॥ २ ॥ ॥ ॥ ॥

प्रचितकसमभिधो धीरधीभिः स्मृतो दंड-
को नद्वयादुत्तरैः सप्तभिर्यैः ॥ ३ ॥ इति
भट्टकेदारविरचिते वृत्तरत्नाकराख्ये छंदसि
समवृत्ताध्यायस्तृतीयः समाप्तः ॥ ३ ॥

तथा नगणद्वयादुत्तरैरग्रेतनैः सप्तभिर्यैर्यगणैर्धीरधीभिः पंडितैः प्रचितकसमभिधोनाम दंडकः स्मृतः कथितः ॥ ३ ॥ इति दंडकाः ॥ इति वृत्तरत्नाकराख्ये छंदसि समवृत्ताध्यायस्तृतीयः ॥ ३ ॥ ॥ ॥ ॥ ॥

विषमे यदि सौ सलगा दले भौ
युजि भाद्गुरुकावुपचित्रम् ॥ १ ॥

भत्रयमोजगतं गुरुणी चेत् युजि च
नजौ ज्ययुतौ द्रुतमध्या ॥ २ ॥

इदानीमर्धसमवृत्ताध्यायो व्याख्यायते ॥ विषमे दले प्रथमतृतीये पादे यदि द्वौ सगणौ ततः सगणलघुगुरवो भवंति पुनर्यदा युजि समे दले द्वितीयचतुर्थपादे द्वौ भौ भगणौ ततो भात् भगणात् द्वौ गुरू भवतस्तदा उपचित्रंनाम छंदः। अत्र तृतीयपादः प्रथमपादसदृशः चतुर्थपादो द्वितीयपादसदृशः एवं सर्वत्रार्धसमच्छंदसि ज्ञेयम् ॥ १ ॥ चेद्यदि ओजगतं विषमपादोत्पन्नं लक्षणं भगणत्रयं प्रथमं ततो गुरुणी गुरुद्वयं च पुनः युजि समे पादे नगणजगणौ जगणयगणसहितौ भवेतां तदा द्रुतमध्यानाम छंदो भवति ॥ २ ॥

सयुगात्सगुरू विषमे चेद्भाविह
वेगवती युजि भाद्गौ ॥ ३ ॥

विषमे पादे सगणयुग्मात्सगणगुरू चेद्यदि भवतः इह युजि समे पादे भौ भगणौ ततः पुनर्भगणात् द्वौ गुरू यदि भवतस्तदा वेगवतीनाम छंदो भवति ॥ ३ ॥

ओजे तपरौ जरौ गुरुश्चेत् म्सौ
ज्गौ भद्रविराड् भवेदनोजे ॥ ४ ॥

ओजे विषमे पादे तगणात्परौ जगणरगणौ गुरुश्चेद्भवति अनोजे समे पादे मसौ जगणगुरू च तदा भद्रविराट्नाम छंदो भवेत् ॥ ४ ॥

असमे सजौ सगुरुयुक्तौ केतुमती
समे भरनगाद्गः ॥ ५ ॥ आख्यान-

की तौ जगुरू च ओजे जतावनो-
जे जगुरू गुरुश्चेत् ॥ ६ ॥

असमे विषमे पादे सजौ सगणजगणौ सगणगुरू ताभ्यां युक्तौ भवेतां समे पादे भगणरगणनगणगुरवः एभ्यः पुनर्गुरुरेको यदि भवति तदा केतुमतीनाम छंदः स्यात् ॥ ५ ॥ ओजे विषमे पादे तौ द्वौ तगणौ जगुरू जगणगुरू पुनर्गुरुरेकश्च पुनरनोजे समे पादे जगणतगणौ ततो जगणगुरू पुनरेको गुरुश्चेत्तदा आख्यानकीनाम छंदः ॥ ६ ॥

जतौ जगौ गो विषमे समे स्यात्
तौ ज्गौ ग एषा विपरीतपूर्वा ॥ ७॥

विषमे पादे जगणतगणौ जगणगुरू गुरुश्च पुनः समे पादे तौ द्वौ तगणौ जगणगुरू गुरुरेकश्च स्यात् तदा एषा विपरीतपूर्वा विपरीताख्यानकी भवति ॥ ७ ॥

सयुगात्सलघू विषमे गुरुर्युजि
नभौ च भरौ हरिणीप्लुता ॥ ८ ॥
अयुजिननरला गुरुः समे न्जमप-
रवक्रमिदं ततो जरौ ॥ ९ ॥

विषमे पादे सगणयुग्मात् सगणलघू गुरुश्च पुनर्युजि समे पादे नगणभगणौ भगणरगणौ च तदा हरिणीप्लुतानाम छंदो भवति ॥ ८ ॥ अयुजि विषमे पादे द्वौ नगणौ ततो रगणलघुगुरवः समे पादे नगणजगणौ ततोऽनंतरं जगणरगणौ इदमपरवक्रंनाम छंदः ॥ ९ ॥

अयुजि नयुगरेफतो यकारो युजि

च नजौ जरगाश्च पुष्पिताग्रा ॥ १० ॥
वदंत्यपरवक्त्राख्यं वैतालीयं विपश्चितः ॥
पुष्पिताग्राभिधं केचिदौपच्छंदसिकं तथा॥ ११॥

अयुजि विषमे पादे नगणयुगं च रेफश्च नगणयुगरेफौ ताभ्यां नगणयुगरेफतो यगणो भवति । च पुनः युजि समे पादे नगणजगणौ ततो जगणरगणगुरवश्च तदा पुष्पिताग्रानाम छंदो भवेत् ॥ १० ॥ यदिदमपरवक्त्राख्यंनाम छंदस्तद्विपश्चितः पंडिता वैतालीयं वदंति कथयंति पाश्चात्त्यं पुष्पिताग्राभिधं छंदो भवेत् ततः केचिदाचार्या औपच्छंदसिकं वदंति ॥ ११ ॥ ॥

स्यादयुग्मके रजौ रजौ समे तु ज-
रौ जरौ गुरुर्यदा यवान्मतीयम् ॥ १२ ॥

इति के० वृत्तरत्नाकरे अर्धसमवृत्ताध्यायः ॥ ४ ॥

अयुग्मके विषमे पादे रगणजगणौ ततो रगणजगणौ तु पुनः समे पादे जगणरगणौ ततो जगणरगणौ गुरुश्च तदा यवाद्यवशब्दात्परा मतीयं यवमतीत्यर्थः ॥ १२ ॥ इति वृत्तरत्नाकराख्ये छंदसि अर्धसमवृत्तरूपश्चतुर्थोऽध्यायः ॥ ४ ॥

मुखपादोऽष्टभिर्वर्णैः परेऽस्मान्मकरालयैः ॥
क्रमाद्वृद्धाः सततं यस्य विचित्रैः
पादैः संपन्नसौंदर्यं ॥ तदभिहितममलधीभिः
पदचतुरूर्ध्वाभिधं वृत्तम् ॥ १ ॥

अथ विषमवृत्ताध्यायो व्याख्यायते । मुखपाद इति । यस्य वृत्तस्य मुखपाद आदिपादोऽष्टभिर्वर्णैः अस्मात्

मुखपादात्परे अग्रेतनास्त्रयः पादा मकरालयैश्चतुर्भिरक्षरैः क्रमात् क्रमेण वृद्धा भवंति। द्वितीयपादो द्वादशभिरक्षरैः तृतीयः पादः षोडशाक्षरैश्चतुर्थो विंशत्यक्षरैः अमलधीभिः पंडितैस्तत् पदचतुरूर्ध्वाभिधं वृत्तमभिहितं भणितम्। किंभूतं तत् सततमनवरतं यस्य वृत्तस्य विचित्रैर्नानाविधैः पादैः संपन्नसौंदर्यं जातचारुत्वम् ॥ १ ॥

प्रथममुदितवृत्ते विरचितविषमचर-
णभाजि गुरुकयुगलनिधने इह क-
लित आडा विधृतरुचिरपदवित-
तियतिरिति भवति पीडः ॥ २ ॥

प्रथममिति। इह शास्त्रे प्रथममुदितवृत्ते पूर्वं प्रतिपादिते वृत्ते पदचतुरूर्ध्वाभिधे वृत्ते आडा कलितः पीडोनाम छंदो भवति। आपीड इत्यर्थः। किंभूते वृत्ते विरचितान् विषमान् चरणान् पादान् भजतीत्येवंशीलः स तथा तस्मिन्। किंभूतः आपीडः गुरुयुगलं निधनेऽवसाने यस्य स तथा। पुनः किंभूतः विधृता रुचिरा पदवितता यतिर्येन स तथा। भावार्थस्त्वयं आपीडछंदसि सर्वं लक्षणं पदचतुरूर्ध्वाभिधसत्कं किंतु पदे पदे प्रांते गुरुद्वयं कार्यम् ॥ २ ॥

प्रथममितरचरणसमुत्थं श्रयति ज-
गति लक्ष्म इतरदितरजनितमपि
यदि चतुर्थं चरणयुगलकमधिकृत-
मपरमिति कलिका सा ॥ ३ ॥ ॥

प्रथममिति। तुर्यं चतुर्थोंऽशः पाद इत्यर्थः। यदि प्रथमं तुर्यं प्रथमपादः अष्टाक्षररूपः इतरचरणसमुत्थं द्वितीयचरण-

भवं द्वादशाक्षररूपं लक्ष्म लक्षणं श्रयति । इतरत्तुर्यं द्वितीयपादो द्वादशाक्षररूपः इतरजनितमपि प्रथमपादजनितमष्टाक्षररूपं श्रयति । अपरं चरणयुगलं तृतीयचतुर्थमधिकारापन्नं पूर्वोक्तं क्रमेण षोडशविंशत्यक्षरं लक्ष्म चिह्नं श्रयति इत्यनेन प्रकारेण जगति लोके तदा सा कलिकानाम छंदः ॥ ३ ॥

द्विगुरुयुतसकलचरणांता मुखचर-
णरचितमनुभवति तृतीयः चरण
इह हि लक्ष्म प्रकृतमपरमखिलम-
पि भजति लवल्या ॥ ४ ॥ ॥

सा लवल्यानाम छंदो भवति । किंभूता । द्वाभ्यां गुरुभ्यां युतं युक्तं सकलचरणानामंतमवसानं यस्याः तथा । इहास्यां लवल्यायां हि निश्चितं तृतीयः चरणो मुखचरणरचितं प्रथमपादोद्भवं लक्ष्म अनुभवति आश्रयते । प्रकृतं प्रस्तुतमपरमन्यदखिलं चरणत्रयं भजति ॥ ४ ॥

प्रथममधिवसति यदि तुर्यं चरम-
चरणपदमवसितगुरुयुग्मा । निखि-
लमपरमुपरितनसममिह ललितपा-
दत्रितयममृतधारा ॥ ५ ॥

प्रथममधीति । प्रथमं तुर्यं प्रथमपादोष्टाक्षररूपो यदि चरमचरणपदं चतुर्थं पदं स्थानमधिवसति प्राप्नोति निखिलं समस्तमपरमन्यत् उपरितनसमं पाश्चात्त्यसमानं ललितपादत्रितयमिह शास्त्रे पदचतुरूर्ध्वे तदा अमृतधारानाम छंदो

भवति । किंभूता अमृतधारा अवसितमवसाने गुरुयुग्मं यस्याः सा अवसितगुरुयुग्मा ॥ ९ ॥

॥ इति पदचतुरूर्ध्वप्रकरणं समाप्तम् ॥

अथोद्गताप्रकरणम्

सजमादिमे सलघुकौ च नसजगुरु-
केष्वथोद्गता ॥ त्र्यंघ्रिगतभनजला
गयुताः सजसा जगौ चरममेकतः
पठेत् ॥ १ ॥ चरणत्रयं भजति लक्ष्म
यदि सकलमुद्गतागतं नौं भगौ भ-
वति सौरभकं चरणे यदीह भवत-
स्तृतीयके ॥ २ ॥

सजमादिमे इति । आदिमे प्रथमे पादे सजं सगणजगणौ पुनः सगणलघू भवतः । अथ द्वितीये पादे नगणसगण-जगणगुरुषु सत्सु उद्गतानाम छंदः । त्रिशब्दस्तृतीये वर्तते त्रिश्चासावंघ्रिश्च त्र्यंघ्रिस्तृतीयपादस्तत्र गतास्ते च ते भगण-नगणजगणलघवो गुरुयुताः स्युः । चरमं पश्चिमं पादं सगण-जगणसगणा जगणगुरू च यदि एकतः एकत्र पठेत् भणेत् । तदा उद्गतानाम छंदो भवति ॥ १ ॥ चरणत्रयमिति । यदि इह छंदसि तृतीये चरणे नौं रगणनगणौ भगौ भगणगुरू च भवतः अपरं तृतीयवर्ज्यं सकलं दलं चरणत्रयं यदि उद्गता-गतं लक्ष्म लक्षणं भजति तदा सौरभकंनाम छंदो भवति ॥ २ ॥

नयुगं सकारयुगलं च भजति चर-
णं तृतीयकं तदुदितमुरुमतिभिर्ल-

लितं यदि शेषमस्य खलु पूर्वतु-
ल्यकम् ॥ ३ ॥

नयुगमिति ॥ यदि तृतीयकं चरणं पादं नगणद्वयं सगण-द्वयं चास्य शेषमपरं पादत्रयं खलु निश्चितं पूर्वतुल्यकमुद्गता-गतं लक्षणं भजति तदा उरुमतिभिः प्रचुरमतिभिः पंडितैस्त-द्वृत्तं ललितं नाम उदितमुक्तम् ॥ ३ ॥

इत्युद्गताप्रकरणं समाप्तम् ॥

उपस्थितप्रचुपितप्रकरणम् ॥

म्सौ ज्भौ गौ प्रथमांघ्रिरेकतः पृथ-
गन्यत् त्रितयं सनजरगास्तथा ननौ
सः त्रिनपरिकलितजयौ प्रचुपित-
मिदमुदितमुपस्थितपूर्वम् ॥ १ ॥

म्साविति ॥ मगणसगणौ जगणभगणौ द्वौ गुरू च एषः प्रथमांघ्रिश्चरणः एकतः प्रथमपादात्पृथगन्यदग्रेतनं पादत्रितयं किंलक्षणरूपमित्याह । सगणनगणजगणरगणगुरवो द्वितीये पादे । तथा ननौ द्वौ नगणौ सगणश्च तृतीये पादे । त्रयश्च ते-नास्त्रिनास्तैस्त्रिनैः परिकलितौ युक्तौ च तौ जयौ जगणयगणौ चतुर्थे पादे यदि भवतस्तदोपस्थितपूर्वं प्रचुपितमुपस्थितप्रचु-पितं नाम छंदः इदमुदितं कथितं छंदोविद्भिरिति शेषः ॥१॥

नौ पादेऽथ तृतीयके सनौ सनयुक्तौ
प्रथमांघ्रियति यदि प्रवर्धमानं त्रि-
तयमपरमपि पूर्वसदृशमिह भवे-

प्रविततमतिभिरिति गदितं खलु
वृत्तम् ॥ २ ॥

नौ पाद इति ॥ अथानंतरं तृतीयके पादे नौ द्वौ नगणौ पुनः सगणनगणौ नगणसगणयुक्तौ यदि स्तः । अपरमन्यत् पादत्रितयमिह शास्त्रे पूर्वसदृशं पाश्चात्यछंदः समानमपि निश्चितं भवेत् । यदि प्रथमांघ्रौ यतिर्यस्मिंस्तत्प्रथमांघ्रियाति । प्रविततमतिभिर्विस्तीर्णबुद्धिभिर्नरैः खलु निश्चितमित्येवंभूतं प्रवर्धमानं छंदो गदितं कथितम् ॥ २ ॥

अस्मिन्नेव तृतीयपादके तजराः स्युः
प्रथमे च विरतिरार्षभं वदंति तच्छु-
द्धविराट्पुरस्थितं त्रितयमपरमपि
यदि पूर्वसमं स्यात् ॥ ३ ॥

अस्मिन्नेवेति ॥ अस्मिन्नेव प्रवर्धमानसंज्ञके छंदसि तृतीयपादके तजराः तगणजगणरगणाः स्युः प्रथमे च पादे विरतिः कार्या । अपरं पादत्रितयं यदि पूर्वसमं स्यात् बुधास्तत् शुद्धविराट्पुरास्थितमार्षभं छंदो वदंति शुद्धविराडार्षभमित्यर्थः ॥ ३ ॥ इत्युपस्थितप्रचुपितप्रकरणम् ॥

विषमाक्षरपादं वा पादैरसमं दशध-
र्मवत् । यच्छंदो नोक्तमत्र गाथेति
तत्सूरिभिः प्रोक्तम् ॥ ४ ॥ इति वृत्तर-
त्नाकराख्ये छंदसि पंचमोऽध्यायः ॥ ५ ॥

विषमाक्षरेति ॥ विषमाक्षराः पादा यस्मिन् तद्विषमाक्षरपादं छंदः यस्यैतमेव अष्टदशसप्तनवाक्षरं पादवृत्तं तथा पादैरसमं

त्रिपादं षट्पादं त्रिषट्पादभेदात् दशधर्मवत् । यथा । दश-धर्मं न जानंति धृतराष्ट्र निबोध तान् । मत्तः प्रमत्त उन्मत्तः श्रांतः क्रुद्धो बुभुक्षितः । त्वरमाणश्च भीरुश्च लुब्धः कामी च ते दश ॥ इयं खलु षट्पदी गाथा । इत्येवमादि यच्छंदोऽत्र नोक्तं तत्पूर्वसूरिभिरित्येषा गाथा प्रोक्ता । किंनाम गाथा । गीतिका कलिका वेल्लितका द्विपदी ध्रुवकोत्साहचत्वरीपदु-लिकाप्रभृति तत्सर्वं गाथासंज्ञकम् ॥ ४ ॥ इति वृत्तरत्नाक-राख्ये छंदसि विषमवृत्तनिरूपणाख्यः पंचमोऽध्यायः ॥ ५ ॥

अथ प्रस्तारः ।

प्रस्तारो नष्टमुद्दिष्टमेकद्व्यादिलग-
क्रिया । संख्या चैवाध्वयोगश्च ष-
डेते प्रत्ययाः स्मृताः ॥ १ ॥

प्रथमं द्वारश्लोकमाह प्रस्तार इत्यादि ॥ द्वाराणि अमूनि प्रस्तारः १ नष्टम् २ उद्दिष्टम् ३ एकद्व्यादिलगक्रिया ४ संख्या ५ अध्वयोगः ६ एते षट् प्रत्ययाः स्मृताः ॥ १ ॥

पादे सर्वगुरावाद्याल्लघुं न्यस्य गुरो-
रधः । यथोपरि तथा शेषं भूयः कु-
र्यादमुं विधिम् ॥ २ ॥

प्रस्तारमाह पादे सर्वेति ॥ सर्वगुरौ पादे आद्याद्गुरोरधो लघुं न्यस्य यथा उपरि तथा शेषं समस्तमुद्धरितं भूयो भूयः पुनः पुनरप्यमुं विधिं कुर्यात् ॥ २ ॥

ऊने दद्याद्गुरूनेव यावत्सर्वलघुर्भवे-
त् ॥ प्रस्तारोऽयं समाख्यातश्छंदोवि-

चितिवेदिभिः ॥ ३ ॥ इति प्रस्तारः ॥

ऊन इति ॥ ऊने पश्चादूने गुरूण्येव दद्यात् तावद्यावत्सर्वलघुर्भवेत् । प्रस्तार्यत इति प्रस्तारः वर्णानां विस्तारो न्यासः समाख्यातः कथितः । कैः छंदसि विचीयंतेऽस्यामिति छंदोविचितिस्तां विदंतीति छंदोविचितिवेदिनस्तैः पंडितैः ॥ ३ ॥

SS SSS म
। ।SS
।।S र
स ।।S

अथ प्रस्तारस्य स्थापनप्रकारः ॥

SS२ SS।
।S त ।S।
S। भ S।।
।। ।।।

एवं संक्षेपेणोक्त्वा विस्तारमाह । सर्वगुरौ पादे इति ॥ पादे यावंतो वर्णास्तावंतो गुरव एव लिख्यंते । आदौ यथा सर्वछंदोजातिषु वर्णसंख्यया गुरवो लिख्यंते । प्रथमरूपजातमेतावता तथा त्र्यक्षरे छंदसि स्थापना दृश्यते । द्वितीयप्रस्ताररूपे क्रियमाणे आद्याद्गुरोरधो लघुर्न्यसनीयो यथात्रैव त्रिगुणप्रस्तारे आद्यगुरोरधो लघुरस्ति तस्माद्विन्यस्तलघोरग्रतः यथोपरितनप्रस्तारे तथैव कर्तव्यम् । यत्रोपरि गुरुस्तत्राप्यधो गुरुः यत्रोपरि लघुस्तत्राधोऽपि लघुः । यत्र प्रस्तारे उपरि द्वौ गुरू अधोऽपि तथैव । भूयो भूयः अमुमेव विधिं कुर्यात् यद्युपरितनप्रस्तारे आदौ लघुर्द्वितीयो गुरुस्तदा तस्माद्वितीयादधो लघुर्न्यस्यते अग्रतो यथोपरि तथा शेषविधिः कार्यः ॥ १ ॥ ऊने दद्याद्गुरूण्येव यत्पूर्वं पाश्चात्यमूनं स्थानं तत्र गुरुर्दीयते अथ तृतीयाद्गुरोरधो लघुस्ततः पूर्वं द्वे गुरुणी

दीयेते यद्वा चतुर्थाद्गुरोरधः यदि लघुः स्यात् तदा त्रीणि ऊनस्थाने दीयंते। एवं तावन्मात्रः कार्यो यावत्सर्वलघुः प्रस्तारो भवेत् ॥ इति प्रस्तारविधिः ॥ तथा चतुर्थवर्णप्रस्तारे षोडश रूपाणि लभ्यंते। स्थापना लिखितैवास्ति एवं वृत्ते यावंतो वर्णास्तावानयं प्रस्तारोऽपि कर्तव्यः ॥ ३ ॥ ॥

नष्टस्य यो भवेदेकस्तस्यार्धेऽर्धे स-
मे च लः ॥ विषमे चैकमादाय तदर्धे-
ऽर्धे गुरुर्भवेत् ॥ १ ॥ इति नष्टं समाप्तम् ॥
उद्दिष्टं द्विगुणानाद्यादुपर्यंकान् स-
मालिखेत् ॥ लघुस्था ये तु तत्रां-
कास्तैः सैकैर्मिश्रितैर्भवत् ॥ १ ॥ इति
उद्दिष्टं समाप्तम् ॥ ॥ ॥

नष्टमाह। नष्टस्येति ॥ नष्टस्य गतरूपस्य योंऽकः तस्यांकस्य समेऽर्धे कृते लो लघुर्लभ्यते च पुनर्विषमे एकमादाय मध्ये निक्षिप्य अर्धे कृते तदर्धे गुरुर्भवेदित्यन्वयार्थः। यथा केनापि पृष्टस्य वृत्तस्य त्र्यक्षरजातिकस्य प्रस्तारे चतुर्थरूपं कीदृशं स्यात्। नष्टस्य चतुर्थरूपोंऽकः समो भवति। तस्य समांकस्यार्धे कृते लघुर्लभ्यते पुनरुद्वरितौ द्वौ समौ तयोरर्धे कृतेऽपि लघुर्लभ्यते तत उद्वरितः एको विषमः विषमो भागं न दत्ते ततो विपमे चैकमादाय एकमध्ये क्षिप्त्वा विषमः समः कार्यः सोऽप्येको विपमः सैकः सन् द्वौ जातौ तदर्धे तस्य विषमांकस्य समीकृतस्यार्धे गुरुरेव लभ्यते। एवं तावत्कर्तव्यं यावत्पादाक्षरप्रमाणं लभ्यते ततस्त्र्यक्षरे छंदसि चतुर्थं रूपम् ॥ ऽईदृशं भवति पुनः केनापि पृष्टं चतुरक्षरे छंदसि

पंचमं रूपं कीदृशं भवति । पंच विषमास्ते सैका जाताः षट् तदर्धे विषमत्वाद्गुरुः प्राप्यते । पुनस्त्रयो विषमाः सैका जाताश्चत्वारस्तदर्धे च गुरुर्लभ्यते । उद्वरितौ द्वौ समौ तदर्धेऽपि च लघुः प्राप्तः पुनरुद्वरित एकोऽस्य विषमस्यार्धं न भवति ततः एकमादायार्धे कृते गुरुः प्राप्तः ततश्चतुरक्षरे छंदसि पंचमं रूपम् ऽऽ।ऽ ईदृशं भवति इत्याम्नायः ॥ १ ॥ इति नष्टविधिः । उद्दिष्टमाह ॥ उद्दिष्टमिति ॥ कोऽर्थः केनापि पट्टके रूपं लिखित्वा कियत्तमं रूपमिदमिति पृच्छति । इदमुद्दिष्टमुच्यते । उद्दिष्टा यावंतो वर्णा लिखिताः संति तेषां मध्य आद्यमक्षरमादौ कृत्वा सर्वेषामुपरि द्विगुणितानंकान् समालिखेत् आद्यवर्णस्य मस्तके एकैको लेख्यः ततः स्थानद्विगुणिताः अंकाः शिरासि लेख्याः । कथं द्वितीयवर्णस्योपरि द्विकास्तृतीयवर्णस्योपरि चतुष्ककः चतुर्थवर्णस्योपरि- अष्टको देयः पंचमवर्णस्योपरि षोडश देयाः षष्ठवर्णस्योपरि द्वात्रिंशदंका देयाः । एवं तावद्यावदंत्यवर्णोपर्यंकः स्यात्तत्र येऽका गुरुरूपोपरि लिखिताः संति तैर्न कार्यम् । लघुस्थाः लघुवर्णोपर्यपि येऽकास्तत्र ते एकतो मूल्यंते एकीकृत्य पुनरेको मध्ये क्षिप्यते ततस्तैर्लघुस्थैरंकैर्मिश्रितैरेकीकृतैः सैकैरेकसहितैर्यावदंको भवेत्तावत्तमामिदं रूपामिति वक्तव्यम् ॥१॥ इत्युद्दिष्टस्याम्नायः समाप्तः ॥ ॥ ॥ ॥

अथैकद्व्यादिलगक्रिया

वर्णान् वृत्तभवान् सैकानुत्तराधरतः
स्थितान् ॥ एकादिक्रमशश्चैतानुप-
र्युपरि निक्षिपेत् ॥ १ ॥ उपांत्यतो

निवर्तेत त्यजेदेकैकमूर्ध्वतः ॥ उप-
र्याद्याद्गुरोरेवमेकद्व्यादिलगक्रिया ॥
॥ २ ॥ इत्येकद्व्यादिलगक्रिया ॥ २ ॥

एकद्व्यादिलगक्रियार्थमाह । वर्णानिति ॥ यावंतो वृत्त-
भवा वर्णास्तावंतः सैकान् एकसहितान् अधऊर्ध्वस्थितान्
कृत्वादिक्रमेण एतानुपरि उपरि निक्षिपेत् उपांत्यतः समीपा-
न्निवर्तेत व्याघटेत ऊर्ध्वतः एकैकं सजेत् । उपरि आद्यादि-
लगक्रिया भवंतीत्यन्वयः ॥ विस्तरमाह ॥ छंदोविद्भिर्वृत्तभ-
वान् यस्मिन् पादे यावंतो वर्णास्तावंत एकका लिख्यंते
सैकान् तन्मध्ये एकः पुनर्लिख्यते उत्तराधरतः अधऊर्ध्व-
स्थिता लिख्यंते । चतुरक्षरपादजातौ स्थापना एतानेकादि-
क्रमेण उपरि उपरि निक्षिपेत् । तावत् यावत् उपांत्यं ततः
उपांत्यान्निवर्तेत उपांत्यं त्यजेदित्यर्थः । एकमेकमुपरि ऊर्ध्व-
तस्त्यजन् । आद्याद्गुरोरिति भावार्थमाह । चतुरक्षरे छंदसि
आद्यमेकं वृत्तं सर्वगुरुर्भवति चत्वारि त्रिगुरूणि भवंति । षट्
रूपाणि द्विगुरूणि भवंति एकं सर्वलघु रूपं भवति कथमि-
त्याह ॥ ये अध ऊर्ध्वं पंच एककास्तत्र प्रथम एको द्वितीये
एकके क्षिप्यते तौ द्वौ जातौ तौ च तृतीयैकके क्षिप्येते ते
त्रयो जाताः ते च चतुष्कैकके क्षिप्यंते चत्वारो जाताः
पाश्चात्योऽकः एकः कुत्रापि न लुप्यते । ततः उपर्यैकमेकं
त्यजन् निवर्तेत ततः पुनरपि प्रथम एको द्वितीये द्वितीयके
क्षिप्यते ते त्रयो जाताः ते च तृतीये त्रिके क्षिप्यंते षट्
जाताः तत उपर्यैकं चतुष्कं त्यजन्निवर्तेत । तत्र प्रथमांके
सर्वगुरुप्रमाणं ततः पुनरपि प्रथमैको द्वितीये त्रिके क्षिप्यते
चत्वारो जाताः ततः उपर्यैकं षट्कं त्यजन्निवर्तेत ततश्चतुष्कः

पाश्चात्योंऽकः स कुत्रापि न लुप्यते । ततः उपर्यंकं त्यजन्नि-
वर्तेत तत्र प्रथमांके सर्वगुरुप्रमाणं द्वितीयांके त्रिगुरुप्रमाणं
तृतीयांके द्विगुरुप्रमाणं चतुर्थांके एकगुरुप्रमाणं पंचमांके सर्व-
लघुप्रमाणं चोर्ध्वतो ज्ञातव्यम् । अधस्ताच्च प्रथमांके सर्वलघु-
प्रमाणं द्वितीयांके त्रिलघुप्रमाणं तृतीयांके द्विलघुप्रमाणं चतु-
र्थांके एकलघुप्रमाणं चरमांके सर्वगुरुप्रमाणं च ज्ञातव्यम्
॥ १ ॥ २ ॥ इति एकद्व्यादिलगाक्रिया ॥

अथ संख्या ।

लगक्रियांकसंदोहे भवेत्संख्याविमि-
श्रिते । उद्दिष्टांकसमाहारः सैको वा
जनयेदिमाम् ॥ १ ॥ इति संख्या ॥

संख्यामाह । लगाक्रियांकेति । लगाक्रियांकसंदोहे एकद्व्या-
दिलगाक्रियायाः अंकसमूहे विमिश्रिते एकतो मिलिते तद्वृत्त-
प्रस्ताररूपसंख्यामिलितोंऽकः स यथा । चतुरक्षरजातौ एकश्च-
त्वारः षट् चत्वार एकश्चैते लगाक्रियांका भवंति एतेषां लग-
क्रियांकानां मिश्रीभावे षोडश भवंति ते षोडश एव संख्या
चतुरक्षरजातेः प्रस्तारस्य । पक्षांतरमाह । वाथवा उद्दिष्टांकस-
माहारः उद्दिष्टवृत्तवर्णशिरसि येंऽकास्तेषामेकीभावः पुनरेकर-
हितः इमां संख्यां जनयेत् तथा चतुरक्षरे छंदसि द्विगुणैरंकै-
रारोप्यमाणैः पंचदश भवंति तैः सैकैः षोडश ॥ १ ॥

अथाध्वा ।

संख्यैव द्विगुणैकोना सद्भिरध्वा प्र-
कीर्तितः । वृत्तस्यांगुलिकीं व्याप्ति-
मधः कुर्यात्तथांगुलम् ॥ १ ॥ इत्यध्वा ॥

अध्वानमाह संख्यैवेति ॥ चतुरक्षरजातौ षोडश संख्यैव सा द्विगुणा द्वात्रिंशदेकोना एकत्रिंशद्भवति स सद्भिरध्वा वृत्तस्थानमार्गः कथितः कथम् । वृत्तस्य वर्णांगुलिकीं अंगुलिपरिमाणां व्याप्तिं स्थानभूमिं कुर्यात् तथा द्वयोः प्रस्तारयोरंतराले एकमेवांगुलं कुर्यात् एकत्रिंशदंगुलायां भुवि एवं चतुरक्षरं छंदः प्रस्तार्यते अथ ऊर्ध्वप्रमाणमिदं न तु दीर्घतायाः प्रमाणं तत्र प्रमाणाभावात् ॥ १ ॥ इत्यध्वा ॥ एते षट् प्रत्ययाः ॥

वंशेऽभूत्काश्यपस्य प्रकटगुणगणः शैवसिद्धांतवेत्ता विप्रः पव्येकनामा विमलतरमतिर्वेदतत्त्वावबोधे ॥ केदारस्तस्य सूनुः शिवचरणयुगाराधनैकाग्रचित्तश्छन्दस्तेनाभिरामं प्रविरचितमिदं वृत्तरत्नाकराख्यम् ॥ १ ॥ इति श्रीभट्टकेदारविरचिते वृत्तरत्नाकराख्ये छंदःशास्त्रे प्रस्तारप्रकरणं समाप्तम् ॥

वंशेऽभूदिति ॥ पव्येकनामा विप्रः काश्यपस्य वंशेऽभूत् किंभूतो विप्रः प्रकटगुणगणः पुनः किंभूतः शैवसिद्धांतवेत्ता पुनः किंभूतः वेदतत्त्वावबोधे विमलतरमतिः तस्य पव्येकस्य केदारः सूनुः किंभूतः केदारः शिवचरणयुगाराधनैकाग्रचित्तः तेन केदारेण इदं वृत्तरत्नाकराख्यं छंदः प्रविरचितम् । किंभूतं छंदः अभिरामम् ॥ १ ॥ इति वृत्तरत्नाकराख्यछंदसो व्याख्या समाप्ता ॥

पुस्तक मिलनेका ठिकाणा.

मुंबई—कालकादेवीरोड पंडितजी
ज्येष्ठाराम मुकुंदजीके पुस्तकालयमें.

कानपुर—हनुमानदास बृजवल्लभ पुस्त-
कालय. ठिकाणा चौकमें
कोतवालीके पास.

बनारस—बाबु कौलेश्वरसिंघजीका
पुस्तकालयमे.

लाहोर—लाला मेहरचंद म्यानेजर
संस्कृत बुकडिपोमें.

मथुरा—बैजनाथ बुकसेलरके पास.

शलेमाबादनिवासी श्रीगौडब्राह्मणवंशोत्पन्न

हरिप्रसाद भगीरथजी.

पुस्तकालय.

ठिकाणा—कालकादेवीरोड रामवाडी,
मुंबई.